# Shri Bhajanaamrutam

# श्री भजनाऽमृतं

**With Blessings of my Parents - Transliterated by K.Shivaram**

# Preamble

This book is basically a transliteration of the original book – Srimad Bhajanamruta (in Kannada). While the major portion of the text has been an extract from Bhajanamruta, I have added several more song lyrics which are commonly sung in several bhajana congregations. The inspiration to digitize this book is from the fact that there was not one of such of its kind in the internet. On the other side, whenever I did travel, to carry around the original book used to contribute weight to my luggage. Now that the entire book is available in the electronic form, I am able to refer to the book anywhere and anytime. This digital form of the book is free of any cost and should also be distributed free of any cost, **provided the first three pages of this document should be included**. The first 3 pages contain, the title Page of this book, the Preamble and the photos of Lord Panduranga and my Parents.

The entire book has been transliterated using BARAHA 9.0 version software. This software has been very effective especially when combined with Microsoft Word (MS Office 2007). The time taken for the transliteration and verification of the same has taken about 1.5 year. This has been done essentially in my free time. There could be several typo-errors. Anyone could help me in rectifying the error by sending me a mail at shivamanik@yahoo.co.in. Please mention the page number, line number and word to have it corrected in the next version to be released.

I owe my gratitude and respect to my noble parents (Sri. N.S. Krishnamurthy and Smt. N.K. Vishalakshi), who have been the sole point of motivation in compiling this book. But for them, maybe, I would not have been introduced to this culture of Namasankeerthanam. I owe my gratitude to Baraha, without the help which it would not have been easy for me to make this transliteration.

**Bangalore** **Shivaram K.**
**First Edition - Devanagiri**

**Contact**:
+91-9845804178, 080-22441224.
T-40, 33A Cross, 14th Main, 4th T-Block,
Jayanagar, Bangalore -560041.

ॐ



PANDURANGA - PANDARPUR



**Smt N.K. Vishalakshi & Sri. N.S. Krishnamurthy**

# श्री राम राम राम
# श्री गुरु चरणारविन्दाभ्यां नमः
# भजना प्रारम्भः

| | |
|---|---|
| पुण्डलीक | प्रतिवचनम् |
| सिद्धिविनायकमूर्तिकी | जय |
| जानकी जीवनस्मरणम् | जय जय राम राम |
| नमःपार्वती पतये | हर हर महादेव |
| पुण्डलीक वरद | हरे विठ्ठल |
| आञ्जनेय स्वामिकी | जय |
| सद्गुरु स्वामिकी | जय |

**नामावळि**

प. हरिनारायण हरिनारायण ।

च. हरिनारायण दुरित निवारण, परमानन्द सदाशिव शङ्कर ।
भक्त जनप्रिय पङ्कज लोचन, हरिनारायण तवदासोहम् ।

**गोपिका जीवनस्मरणम् – गोविन्द गोविन्द ।**

१. शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् । प्रसन्न वदनं ध्यायेत् सर्व विघ्नोप शान्तये ॥

२. श्रीकान्तो मातुलो यस्य जननी सर्वमङ्गळा । जनकः शङ्करो देवः तं वन्दे कुञ्जराननम् ॥

३. यस्य द्विरद वक्त्राद्याः पारिषद्याः परश्शतम् । विघ्नं निघ्नन्ति सततं विष्वक्सेनं तमाश्रये ॥

४. रमापति पदाम्भोज परिस्फुरति मानसम् । सेनापतिमहं वन्दे विष्वक्सेनं निरन्तरम् ॥

५. भगवन्नामसाम्राज्य लक्ष्मीसर्वस्वविग्रहम् । श्रीमद्बोधेन्द्र योगीन्द्र देशिकेन्द्रं उपास्महे ॥

६. ईशे तस्य च नामनि प्रविमलं ज्ञानं तयोरूर्जितम् ।
प्रेम प्रेम च तत्परेशु विरतिश्चान्यत्र सर्वत्र च ॥
ईशेक्षा करुणा च यस्य नियता वृत्ति श्श्रितस्यापि ।
यं तं वन्दे नररूपमन्तकरिपुं श्री वेङ्कटेशं गुरुम् ॥

७. भगवन्नाम बोधेन्द्र श्रीधरार्यात्मविग्रहम् । श्रीमद्वेङ्कटरामाख्य देशिकेन्द्रमुपास्महे ॥
८. नाम साम्राज्यरूपाणां बोधेन्द्र श्रीधरात्मनाम् । प्रणामं ये प्रकुर्वन्ति तेषामपि नमो नमः ॥
९. प्रह्लाद नारद पराशर पुण्डलीक व्यासाम्बरीष शुक शौनक भीष्मदाल्भ्यान् ।
रुक्माङ्गदार्जुन वशिष्ट विभीषणादीन् पुण्यानिमान् परम भागवतान् स्मारमि ॥
१०. एतन्निर्विद्यमानानां इच्चतामकुतोभयम् । योगिनां नृपनिर्णीतं हरेर्नामानु कीर्तनम् ॥
११. हरेर्नामैव नामैव नामैव मम जीवनम् । कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा ॥
१२. विसृज्य लज्जां योऽधीते मन्नामानि निरन्तरम् । कुलकोटि समायुक्तो लभते मामकं पदम् ॥
१३. विष्णोर्गानञ्च नृत्यञ्च नटनञ्च विशेषतः । (हे) ब्रह्मन् ब्राह्मण जातीनां कर्त्वयं नित्यकर्मवत् ॥
१४. कालक्षेपो न कर्तव्यः क्षीणमायुः क्षणे क्षणे । यमस्य करुणा नास्ति कर्तव्यं हरिकीर्तनम् ॥
१५. नाहं वसामि वैकुण्ठे न योगि हृदये रवौ । मद्भक्ताः यत्र गायन्ति तत्र तिष्ठामि नारद ॥
१६. कलेर्दोषनिधे राजन्, अस्ति ह्येको महान्गुणः । कीर्तनादेव कृष्णस्य मुक्तसङ्गः परं व्रजेत् ॥
१७. कलौ कल्मष चित्तानां पापद्रौयोपजीविनाम् । विधिक्रिया विहीनानां गतिर्गोविन्द कीर्तनम् ॥
१८. ध्यायन् कृते यजन् यज्ञैः त्रेतायां द्वापरेऽर्चयन् । यदाप्नोति तदाप्नोति कलौ सङ्कीर्त्य केशवम् ॥
१९. नाम्नोऽस्ति यावती शक्तिः पाप निर्हरणे हरेः । तावत्कर्तुं नशक्नोति पातकं पातकी जनः ॥
२०. हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः । अनिच्छयापि संस्पृष्टः दहत्येव हि पावकः ॥
२१. स्मृते सकलकल्याणभाजनं यत्र जायते । पुरुषस्तमजं नित्यं व्रजामि शरणं हरिम् ॥
२२. आलोड्य सर्व शास्त्राणि विचार्य च पुनः पुनः । इदेमकं सुनिष्पन्नं ध्येयो नारायणस्सदा ॥
२३. नमोस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षि शिरोरु बाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्र कोटियुगधारिणे नमः ॥
२४. प्रह्लाद भागदेयं निगम महार्द्रेर्गुहान्त राधेयम् ।
नरहरि पदाभिधेयं विबुध विधेयं ममानुसन्धेयम् ॥
२५. यो दण्डकारण्य निशाचरेन्द्रान् कोदण्डलीलाविशयीचकार ।
वेदण्ड शुण्डायद भाहुदण्डः कोदण्डपाणिः कुलदैवतं नः ॥
२६. कृष्णः करोति कल्याणं कंस कुञ्जर केसरी । काळिन्दीजलकल्लोल कोलाहल कुतूहली ॥
२७. श्री शेषशैल सुनिकेतन दिव्यमूर्ते नारायणाचुत हरे नळिनायताक्ष ।
लीलाकटाक्षपरिक्षितसर्वलोक श्रीवेङ्कटेश मम देहि करावलम्बम् ॥
२८. समचरणसरोजं सान्द्रनीलम्भुदाभं जघननिहितपाणिं मण्डनं मण्डनानाम् ।
तरुणतुळसीमालाकन्धरं कञ्जनेत्रं सदयधवळ हासं विठ्ठलं चिन्तयामि ॥
२९. कृष्ण कृष्णेति भाषन्तं सुस्वरं सुमनोहरम् । यतिवेषधरं सौम्यं श्री चैतन्यं नमाम्यहम् ॥
३०. सर्व कल्याण दातारं सर्वापद्घन वारकम् । अपार करुणा मूर्तिं आञ्जनेयं नमाम्यहम् ॥
३१. बुद्धिः बलं यशो धैर्यं निर्भयत्वं अरोगिता । अजाड्यं वाक्पटुत्वं च हनूमत् स्मरणाद्भवेत् ॥
३२. दूरीकृत सीतार्तिः प्रकटीकृत राम वैभव स्फूर्तिः ।
दारित दशमुखकीर्तिः पुरतो मम भातु हनुमतो मूर्तिः ॥

---

३३. नारायणं नमस्कृत्य नरं चैव नरोत्तमम् । देवीं सरस्वतीं व्यासं ततो जय मुदीरयेत् ॥
३४. योऽन्तः प्रविश्य मम वाचमिमां प्रसुप्तां सञ्जीवयत्यखिलशक्तिधरः स्वधाम्ना ।
अन्यांश्च हस्तचरणश्रवणत्वगादीन् प्राणान्नमो भगवते पुरुषाय तुभ्यम् ॥
३५. गोकोटिदानं ग्रहणादिकाले प्रयागगङ्गायुत कल्पवासः ।
यज्ञायुतं मेरुसुवर्णदानं गोविन्दकीर्तन न समं शतांशेः ॥
३६. कृष्णानुस्मरणादेव पापसङ्घात पञ्जरः शतधा भेदमायाति गिरिर्वज्रहतो यथा ॥
३७. वैदेहीसहितं सुरद्रुमतले हैमे महामण्टपे, मध्ये पुष्पकमासने मणिमये वीरासने सुस्थितम् ।
अग्रे वाचयति पभञ्जनसुते तत्त्वं मुनिभ्यःपरं, व्याख्यातं भरतादिभिःपरिवृतं रामंभजे श्यामलम् ॥
३८. हे गोपालक हे कृपाजलनिधे हे सिन्धुकन्यापते हे कंसान्तक हे गजेन्द्र करुणावारीण हे माधव
हे रामानुज हे जगत्त्रयगुरो हे पुण्डरीकाक्ष मां हे गोपीजननाथ पालय परं जानामि न त्वां विना ॥

श्री सीता लक्ष्मण भरत शतृघ्न हनूमत्समेत श्री रामचन्द्राय परम गुरुवे नमः ।
श्री राधा रुक्मिणी सत्यभामा समेत श्री वेणुगोपालकृष्ण परब्रह्मणे नमः ॥
स्वस्त्यस्तु समस्त मङ्गळानि सन्तु लोकाःसमस्तास्सुखिनोभवन्तु ॥ श्री हरये नमः ॥

| राग : नाट | ताळम् : झम्पे |
|---|---|

मूषक वाहन मोदक हस्त, चामर कर्ण विलम्बित सूत्र ।
वामन रूप महेश्वर पुत्र, विघ्न विनायक पाद नमस्ते ॥
गजाननं भूतगणादिसेवितं कपित्थजम्बुफलसार भक्षितम् ।
उमासुतं शोकविनाशकारणं नमामि विघ्नेश्वर पाद पङ्कजम् ॥

**जय सिद्धिविनायक मूर्तिकी – जय**

## तोडेय मङ्गळम्

१. जय जानकीरमण जय विभीषणशरण । जय सरोरुहचरण जय दीनकरुण ॥
२. जय लोकशरण्य जय भक्तकारुण्य । जय दिव्यलावण्य जय जगत्पुण्य ॥
३. सकलोकावास साकेतपुरवास । अकळङ्कनिजदास अब्जमुखहास ॥
४. शुकमुनिस्तुतिपात्र शुभद निजचारित्र । मकर कुण्डलकर्ण मेघसमवर्ण ॥
५. कमनीयकोटीर कौस्तुभालङ्कार । कमलाक्ष रघुवीर कमल विहार ॥
६. समररिपुजयधीर सकलगुणगम्भीर । अमल हृत्सञ्चार अखिलार्तिहार ॥
७. रूपनिन्दितमार रुचिरसद्गुण शूर । भूप दशरथकुमार भूभार हार ॥

८. पापसङ्घविदार पङ्क्ति मुख संहार । श्रीपते सुकुमार सीताविहार ॥
९. मारुतात्मज काम महनीय घनश्याम । करुणाब्धिजनि सोम कल्याणराम ॥
१०. शरणागतस्तोम शम्भुनुत निजनाम । परिपूर्ण रङ्गधाम पट्टाभिराम ॥

मन्दार मूले मदनाभिरामं बिम्बाधरा पूरित वेणुनादम् ।
गो गोप गोपीजन मध्य संस्थं गोपं भजे गोकुल पूर्ण चन्द्रम् ॥

| राग : आरभि | ताळम् : छापु |
|---|---|

१. शरणु शरणु सुरेन्द्र सन्नुत शरणु श्रीसतिवल्लभ ।
शरणु राक्षसगर्वसंहर शरणु वेङ्कट नायक ॥
२. अनिमिषेन्द्रुलु मुनुलु दिक्पतुलु अमर किन्नर सिद्धुलु ।
घनततो रम्भादि कान्तलु गाचिना रेच्चरिकया ॥
३. कमलधरुडुनु कमलमित्रुडु कमलशत्रुडु कमलजु ।
क्रममुतो नी कोलुवुकिप्पुडु गाचिना रेच्चरिकया ॥
४. परमपद गोविन्द माधव पद्मनाभ जनार्दन ।
धरणिधरवर गरुडवाहन दैत्यबलिमदभञ्जन ॥
५. एन्नगल प्रह्लाद भक्तुडु येलमितो मिमु कोलुव वच्चिरि ।
विन्नपमु विनवय्य देवर वेङ्कटाचल नायक ॥
६. श्री पदाम्बुज शेष विग्रह शेष तल्पित शयनुडु ।
श्रीपते अलमेलु मोहन वेङ्कटाचल नायक ॥

| राग : मध्यमावति | ताळम् : आदि |
|---|---|

१. मुरहर नगधर मुकुन्द माधव गरुडगमन पङ्कजनाभ ।
परमपुरष भवभञ्जन केशव नरमृगशरीर नमो नमो ॥
प. नारायण ते नमो नमो भव नारद सन्नुत नमो नमो ।
२. जलधिशयन रविचन्द्र विलोचन जलरुह भवनुत चरणयुग ।
बलिबन्धन गोपीजनवल्लभ नळिनोदर ते नमो नमो ॥
३. श्रीवत्सलाञ्छन पीताम्बरधर देवकी नन्दन नारायण ।
गोवत्सपालन गोवर्धनधर गोपप्रिय ते नमो नमो ॥
४. कौसल्यात्मज कामितफलद करुणासागर कान्तिमय ।
दशरथ नन्दन दनुजकुलान्तक कुशलवजनक ते नमो नमो ॥

---

५. तारापतिहर तपनकुलोद्भव तापस मुनिगण वन्द्यपद ।
मारिचान्तक मारुतिसेवित वारिधि बन्धन नमो नमो ॥
६. आदिदेव सकलागम पूजित यादवकुल मोहनरूप ।
वेदोद्धर श्रीवेङ्कटनायक नादप्रिय ते नमो नमो ॥

| राग : सावेरि | ताळम् : रूपक |
|---|---|

१. देवेश गणाराधित दिव्याम्बुजपाद, श्री वेङ्कटगिरिनायक श्रीश हेच्चरिक ॥
२. कलिमानुष कलुषापह कमनीयसुकीर्ते, अलमेलुमङ्गामोहनमूर्ते हेच्चरिक ॥
३. जलजासन परिपालन जगदेक निदान, कलाशाम्बुधि तटशोभित चरण हेच्चरिक ॥
४. वकुलासन हरि चन्दन वनमध्यविहार, सकलागमपरिपालन चतुर हेच्चरिक ॥
५. नारायण नरपोषण नरकादि संहरण, हे रावण मदभञ्जन धीर हेच्चरिक ॥
६. श्री केशव नारायण गोविन्द मुरारे, हे माधव मधुसूदन दामोदर शौरे ॥
७. शेषाचलनिलय वरभूष मणिवलय, शेषादि विजयि मौनि विधेय हेच्चरिक ॥
८. रजनीचरवरनायक कालावनमाला, व्रजपालन वर विजयगोपाल हेच्चरिक ॥

| राग : मङ्गळकौशिक | ताळम् : आदि |
|---|---|

प. माधव भवतु ते मङ्गळम् । मधु मुरहर ते मङ्गळम् ॥
१. अरविन्दलोचन अघबृन्दमोचन । सुरबृन्द वन्दित मङ्गळम् ॥
२. नरवर नन्दन नागारिकेतन । मरकतमणिनिभ मङ्गळम् ॥
३. नन्दवरसुकुमार नवनीत दधिचोर । मन्दरगिरिधर मङ्गळम् ॥
४. कुन्दरदनावर कूजितनूपुर । सुन्दरवदन ते मङ्गळम् ॥
५. दधि नवनीतचोर तरुणी गोपिकाजार । मधुकैटभसंहार मङ्गळम् ॥
६. गजराजपरिपाल घन तुळसीवनमाल । निजदासपरिपाल मङ्गळम् ॥
७. व्रजसुन्दरीविलोल विबुधेन्द्रपरिपाल । विजयगोपालपाल मङ्गळम् ॥

## नामावळि

राम गोविन्द राम राम कल्याण राम । राम पट्टाभिराम राघव ।
गोविन्द माधव गोपाल केशव नरसिंहाच्युत नारायण ।
दशरथ नन्दन सीता मनोहर दानव संहार दयानिधे ।
वसुदेव नन्दन राधा मनोहर पूतन संहार भुवनपते ।

---

राम राघव राजीवलोचन कामितफलद करिवरद ।
कृष्ण केशव अम्बुजलोचन वाञ्छितफलद यदुवरद ।
हरे राम गोपालं भज गोविन्दं मम जीवनम् ।
भज गोविन्दं मम जीवनं भज गोपालं मम जीवनम् ।
गोविन्दं भजरे मानस गोपालं भजरे ।
सीतापते दाशरथे दशरथ नन्दन दयानिधे ।
राधापते पार्थसखे यादव नन्दन कृपानिधे ।
नारायणं भजरे मानस नारायणं भजरे ।
गोविन्दं भजरे मानस गोपालं भजरे ।

**सर्वत्र गोविन्द नाम सङ्कीर्तनं – गोविन्द गोविन्द**

-----------------------------------------------------------------------

## गुरु ध्यान
## श्री दक्षिणामूर्तिः

वटविटपिसमीपे भूमिभागे निषण्णं सकल मुनिजनानां ज्ञानदातारमारात् ।
त्रिभुवन गुरुमीशं दक्षिणामूर्ति देवं जनन मरण दुःखच्छेददक्षं नमामि ॥

| राग : तोडि | ताळम् : त्रिपुट |
|---|---|

प. श्री दक्षिणामूर्तिं भजरे मानस श्री दक्षिणामूर्तिं भजरे ।
अ. रक्षित जगत्रयं वटमूलवासिनम् ।
च. सनकादि योगिजन संशय भेदिनम् । मौन व्याख्यानेन प्रकटित परतत्वम् ॥
अमित विभवयुत सुन्दर विग्रहम् । अखिल जगद्गुरं सुब्रह्मण्यविनुतम् ॥

| राग : अठाण | ताळम् : त्रिपुट |
|---|---|

प. दक्षिण शास्यं गुरुं वन्दे । दक्षिण शास्यं गुरुं वन्दे ।
अ. दक्षिण द्वर हरं दाक्षायणि वरम् ।
१. आनन्द मूर्तिं स्वानन्द स्पूर्तिम् । वटमूल वासं कुटिल निवासम् ।
२. शशिकण्ठ मौलिं शङ्कर केळिम् । अरुणा चलेशं अरुण निवेशम् ।
३. अज्ञान हरणं प्रज्ञा वितरणम् । सर्वात्मरूपं शर्वं अरूपम् ।
४. श्री सुन्दरेशं भासूर मीशम् । पुस्तक पाणिं स्वस्तीन पाणिम् ।
५. ललाट नेत्रं ललित कळत्रम् । नळिनाभ नेत्रं भद्राचलेशं भद्राद्रिवासम् ।

| राग : शभपन्तुवराळि | ताळम् : त्रिपुट |
|---|---|

प. श्री दक्षिणमूर्तिं सन्ततं भजे ।
अ. वरं अक्षिण कृपा निधिम् । रक्षितामर बृन्दम् ।
१. अक्षहार शोबितं मोक्षमार्ग दर्शकम् । वटतरु मूलवासं जर शोभित श्लीर्शषम् ।
२. कैटभादि सेवितं नटन नृत्य लोलुपम् । सर्वलोक गुरु वरं सर्वसद्गुणा कारम् ।
३. सर्व कला मन्दिरं सर्व मङ्गळ प्रदम् । भव रोग बिषण् वरं शिव सायुज्य प्रदम् ।
४. भव विष्णु विधि रूपं धवळ भस्म भूषितम् ।

| राग : अठाण | ताळम् : त्रिपुट |
|---|---|

प. पालय मां श्री दक्षिणामूर्ते भक्तजनो धारक । हरे शम्भो ।
१. वटमूलवास वरगुण शीला वेदान्त मूल सद्गुरु नाथ ।
२. सामगानप्रिय सनकादिवन्द्य शरणागत वत्सल । हरे शम्भो ।
३. चन्द्र कलाधर गङ्गाजटाधर मौन व्याख्यानेन तत् उपदेश ।
४. रुद्राक्षमालाधर मङ्गळ रूप मन्दहास वदन । हरे शम्भो ।
५. महादेव मन्दहास वदन मृत्युञ्जय देव माम्पाहि शम्भो । महादेव देव ।

**नामावळि**

१. भजरे मानस गुरुमूर्तिं – भजरे श्री दक्षिणामूर्तिम् ।
२. दक्षिणामूर्ते मां पाहि शम्भो शङ्कर मां पाहि ।
३. दक्षिणामूर्ते दीन दयाळो दयाया मामव देव कृपाळो ।
४. दक्षिणामूर्तिं दक्षयाग कीर्तिम् । दाक्षायणि वरं रक्षमामीश्वरम् ।
वटमूलवासं वरमन्दहासम् । स्मर रूप नाशं स्मर सुन्देशम् ।

**जय सद्गुरु दक्षिणामूर्तिकी – जय**

**श्री शङ्कराचार्या**

१. अज्ञानन्तर्गहनपतितान् आत्मा विद्योपदेशैः त्रातुं लोकान् भवदवशिखा ताप पापच्यमानान् ।
मुक्त्वामौनं वटविटपिनो मूलतो निष्पतन्ती शम्भोर्मूर्तिश्चरति भुवने शङ्कराचार्य रूप ॥
२. श्रुतिस्मृति पुराणानामालयं करुणालयं नमामि भवद्पाद शङ्करं लोकशङ्करम् ॥
३. कालडियिलवतरित्त करुणैपेरुं कडले –निन् कालडिये तञ्जमेन्न्रु कालं कळिह्क्किलानेन् ।
कालभयं तीर्तुक्कडुगिये वन्दु एन्दन् कालडि ओयुमुन्नै निन् कालडि चेर्प्प्याये ॥

| राग : शङ्कराभरण | ताळम् : आदि |
|---|---|

प. तिरुक्कुमरनाय् अवतरित्तार् तिरुक्कुयिलैअकन्नु शिवगुरु आर्याम्बाळ् ॥
अ. इरुक्कमुदल् चतुर्मरैगळ् तळहैक्कसकल जगद्गुरुवे शङ्कर जयजय वेन्नळहैक्क ॥
च. नास्तिक पञ्जुमल्लैक्कु चूरावळियेन नर्कळिदय इरुळर एळ्हु शुडरेन ।
आस्तिक मतप्पयिर् सेळ्हिक्क एळ्हुमुगिलेन आदि अन्तमिल्लाद शिवन् कालडियिल् अन्तण ॥

---

## नामावळि

१. शङ्कर गुरो जय जय शङ्कर गुरो षण्मतस्स्थापक शङ्कर गुरो ।
२. कालडियिलुदित्त शङ्करगुरो कालभयं तीर्तरुळ्वाय् शङ्करगुरो ।

**श्री शङ्कर भागवत्पाद मूर्तिकी – जय**

## श्री बोधेन्द्रगुरु

१. सर्वेषामाश्रमाणां विरचित नियम प्रौढ धर्म प्रजानाम् ।
ऋग्वेदाद्यागमान्त श्रवण सुमनन ध्यानयोगादि भाजाम् ॥
चण्डालत्वादि शान्त्यै निरवधि कृपया नाम भक्तिं विधाय ।
श्रीमद्बोधेन्द्र योगी बहुमहित यशा: तन्नमस्ये सदाऽहम् ॥
२. यस्य स्मरण मात्रेण नाम भक्तिः प्रजायते । तं नाममि यति:श्रेष्ठं बोधेन्द्रं जगतां गुरुम् ।

| राग : देवगान्धारि | ताळम् : आदि |
|---|---|

प. बोधेन्द्रं जगतां गुरुमाश्रये भोग मोक्ष सिद्धये ।
अ. बोधपयोनिधि पूर्णसुधाम्शुं बोधवदमल हृदब्ज खरांशुम् ।
१. रामाख्याब्धि विहार विलोलं रामाख्यापरपोषण शीलम् ।
रामाख्याधुत किल्बिषजालं रामाख्या गर्जन जितकालम् ॥
२. कमलासनहरिशङ्कररूपं कमलासुतशतसुन्दररूपम् ।
विमलाशयगृह वरमणि दीपं विमतावनलब्धकीर्ति कलापम् ॥
३. नामनिबन्धन शतकर्तारं नामसाम्राज्यपदभर्तारम् ।
नाममहानिधि दानोदारं नामपरं नरसिम्होद्धारम् ॥
४. हरिहर भेद धिक्कारं धीरं हरिहर रूपं श्रियाजितमारम् ।
अरिषड्वर्गजितं महाशूरं वर गोविन्दपुरालयाधारम् ॥

| राग : कानडा | ताळम् : छापु |
|---|---|

प. बोधेन्द्रगुरुं भजेहं योगीन्द्रवरं श्रीधर वेङ्कटेश्वर सहचरम् ॥
१. राम कथारसज्ञं राम नाम तत्त्वज्ञं भूमिजापतिप्रज्ञं नामशास्त्रगुणज्ञम् ॥
२. परमत विभेदकं परमभक्ति बोधकं परम सुखदायकं परिजनेष्ट देशिकम् ॥
३. भवताप भयहरं शिवरामाश्रमीश्वरं कवि हृत्पद्ममिहिरं विविध गुण निकरम् ॥

| राग : बेहाग/दर्बार | ताळम् : आदि |
| --- | --- |

प. भजरे मानस बोधेन्द्र योगीन्द्रं भजनपराशयाह्लादन चन्द्रम् ॥
अ. निजगतिनिश्चयजित वारणेन्द्रं यतिवरमानन्द पीयूषसान्द्रम् ॥
१. मन्मथ कोटि मनोहर रूपं मञ्जुळसूत्रकरं जिततापम् ।
उन्मद वादि वचोऽतिदुरापं ऊर्ध्व पुण्ड्राङ्कित फालमपापम् ॥
२. तारक ब्रह्म सुखाब्धि गम्भीरं तामरसाक्ष विधीशावतारम् ।
सारस लोचन दीर्घ प्रचारं सौरभ वर तुळसी मणिहारम् ॥
३. कामादि षड्रिपु खण्डन धीरं कारुण्य सागर पूर विहारम् ।
राम नाम सिद्धान्त विचारं रामदास हृत्पञ्जरकीरम् ॥

| राग : सुरटि | ताळम् : आदि |
| --- | --- |

प. श्री गुरु बोधेन्द्रं मानस भज भज योगीन्द्रम् ।
१. भागवतामृत हर्षितसुजनं भवभयसिन्धु प्लवपद नळिनम् ॥
२. श्री शुक नारद सनक समानं श्रीधरनाम रसामृतपानम् ॥
३. रागद्वेष रहितान्तः करणं रामदास परिपूजित चरणम् ॥

| राग : कापि | ताळम् : छापु |
| --- | --- |

प. भजरे मानस बोधेन्द्र योगीन्द्रं भगवन्नाम विग्रहं देशिकेन्द्रम् ॥
अ. भुजगेन्द्रभूषण गजराजवरद पङ्कज सम्भवात्मकं त्रिजगद्गुरुमूर्तिम् ॥
१. यतिं अति सुन्दराकृतिं ऊर्ध्व पुण्ड्राङ्कित निटिलं करधृतजपसूत्रम् ।
श्रुतिसकलागम स्मृति सम्यक् प्रतिपादित नामाङ्कित रूपं पावन मूर्तिम् ॥
२. रघुपति पादाब्ज पूजा स्वतन्त्रं निखिल शिष्याम्बोनिधि पूर्ण चन्द्रम् ।
अघसङ्घभवनाशन पतकेन्द्रं अनवधि करूणा दिव्यामृत सान्द्रम् ॥
३. परमभक्तसेव्यपादसरोजं प्रतिपद बुध वारण मृगराजम् ।
हरिहरसुत वरकवि हृद्विलासं अनुपमानन्द श्रीदंमृदुहासम् ॥

| राग : तोडि | ताळम् : आदि |
|---|---|

प. सतमनि प्रणुतिम्पुचुनु ओ सखियरो ध्यानिन्तुगा नेनु ॥
अ. मतिगलयट्टि नामसिद्धुलकु उन्मत्तुलैन श्री बोधेन्द्रुले ॥
१. नामकीर्तनमुद्धरिम्पग नलुव वेन्नुडिशुडु नोकटियै ।
भूमिलो बोधेन्द्र गुरुलनि पेरुकोन्न श्री बोधेन्द्रुले ॥
२. अतनि पादरजो अभिषेकमुल् ऐनवारिमै गगुर् पुलतो ।
क्षितिनि सञ्चरण जेसि जनलकु गतुलोनर्चु श्रीधरुनि दलचि ॥
३. रामनाममु मिञ्चजेसिन रसिकता प्रबोध मूर्तियै ।
भूमिलो बोधेन्द्र गुरुलनि पेरुकोन्न श्रीकृष्णु दलचि ॥

**नामावळि**

१. भजरे मानस बोधेन्द्रं भवाब्धि तरणं योगीन्द्रम् ।
२. बोधेन्द्र सद्गुरो योगीन्द्र सद्गुरो गोविन्द पुरवास बोधेन्द्र सद्गुरो ।
सद्गुरो सद्गुरो बोधेन्द्र सद्गुरो गोविन्द नामरुचिं देहि मे सद्गुरो ॥

**सद्गुरु बोधेन्द्र स्वामिकी जय**

**श्री श्रीधर वेङ्कटश अय्यावाळ्**

श्रीकण्ठम् इव भास्वन्तं शिवनाम परायणम् । श्रीधरं वेङ्कटेशार्यं श्रेयसे गुरुमाश्रये ॥

| राग : केदार गौळ | ताळम् : आदि |
|---|---|

प. भक्ते श्रीधर वेङ्कट गुरुवर्यरूपमुग महिचलगे शिव ।
अ. भुक्ति मुक्तुलकु कारणमगु चिन्मूर्तियन्दु निन्डु प्रेमगल शिव ।
१. फालमन्दु त्रिपुण्ड्रमुनु व्रेळ्ळनु धरिञ्चि सूत्रमुनु तम ।
नालुकन् शिवुनि नाम प्रेम लोलमुखोल्लासमै वेलयु शिव ॥
२. हरिहरलु ओकरूपमै धरनवतरिञ्चि तम्मुनम्मु सुजनुलन् ।
अरयुचुन् पूर्ण भक्त्यनुग्रहमिरवुगा करुणिञ्चि चल्ल जेसिन शिव ॥
३. वेदमे सुरसालमै धरवेलयुदाननुण्डि पण्डुजार
शुकादुलकुन् ग्रोलु नट्टि कीर्ति सुखात्मकुडौ कृष्ण पोन्दुजेसिन शिव ॥

| राग : काम्बोदि | ताळम् : आदि |
|---|---|

प. स्वामी मीरे गतियनि प्रेम दलतुनय्या श्रीगुरु ।
अ. पामरतनुमानि मिम्मु परम प्रयोजनमुगानु मनसुन ॥
१. करुणनु ननु जूचे देवर कन्नुले गतियय्या आ–
दरणन् अभयमिच्चे देवर करमुले गतियय्या श्रीगुरु ॥
२. मुदमलरग जेसे देवर वदनमे गतियय्या ना–
हृदयमु चल्लग जेयु देवर पदमुले गतियय्य श्रीगुरु ॥
३. विनि हरिकथ चोक्के देवर वीनुले गतियय्या
अनयमु हरिकीर्तिञ्चु मी वाक् अमृतमे गतियय्या श्रीगुरु ॥
४. श्रुतिसारमु हरिनाममनि आश्रितुलकु बोधिञ्चि श्री–
पति हृदयमु वासम्बु जेयु भाग्यमुलिप्पिञ्चु श्रीगुरु ॥
५. चल्लनि मा गोपालकृष्ण स्वामि करुण ग्रम्मि ने–
गोल्लग मी पदपङ्कजमुले गुरुतुग नेरनम्मि श्रीगुरु ॥

| राग : शङ्कराभरण | ताळम् : झम्पे |
|---|---|

प. गुरुमूर्ति पादमुले गुरुतुगा ध्यानिञ्चि स्थिरमैन सुखमु बोन्देदनु ।
अ. हरिहरुलिरुवरुन् ओकरनुचु भक्तियु सेय नररूपमैन श्रीधर वेङ्कटेश्वर श्रीधर ॥
१. राम नाममुनन् अनुरागमु बुट्टिञ्चि प्रेमतो तम भक्तिकेयुनिकि जेसि
येमरक निट्टि मधुराक्षरमे तारकमनि महिम देलिपि नन्नु रक्षिञ्चिन श्रीधर ॥
२. चिन्तचे बलुगाक जेन्दि नेनुन्न रीति अन्तयुनु तेलिसि गुरुडन्तरङ्गमुन
सन्ततमु नन्नु भगवन्तुनि दलचमनि अनन्तुनि कल्याणगुणमन्दु नन्नु देलिञ्चु श्रीधर ॥
३. श्रुति धर्म शास्त्र सम्मतिनि हरि नाममे गतियनुचु रूढमगु ग्रन्थमुल् जेसिन
अतुलितुडु श्री वेङ्कटार्युडे ने जेयु कृतिलोनु गोपालकृष्णुडै तोचिन श्रीधर ॥

| राग : शङ्कराभरण | ताळम् : छापु |
|---|---|

प. श्रीधर वेङ्कटेशं स्मराम्यहं श्रीधर वेङ्कटेशम् ।
अ. साधुजन हितोपदेशकं सद्देशिकम् ।
१. वरभस्माङ्कित गात्रं हरनामजपसूत्रम् । हरविनिहितनेत्रं हर कृपारस पात्रम् ॥
२. कलितनामसिद्धान्तं दलित दुरितध्वान्तम् । ज्वलत् आदित्यवत् भान्तं फलित विज्ञान स्वान्तम् ॥

३. शिवचिन्तन विलोलं शिवकथोदधि खेलम् । शिवरामश्रमिपालं शिवकैवल्यानुकूलम् ॥

| राग : काम्बोदि | ताळम् : त्रिपुट |
|---|---|

प. मी चरण भक्ति मिञ्चि बिक्षमडिगिनन् आलोचन जेसे त्रिलोचनुडु ।
अ. वाचि बतिमालि पादमुलकु म्रोक्किन ननु क्रोच बड जूचेनु श्रीगुरुमणि देवर गतियनि ॥
१. मेमुवारनि कोन्त मेरजेयु नी बुद्धिकि एमन्दुननि इट्ल एन्दुकु नीकु ।
रामनाममे तारकमनि दलचुचु मिगुल तामसिञ्चक ब्रह्मे सत्यम्बनुचु एञ्चवलने गानि ॥
२. अन्दरिकि नेनन्तर्यमियैन नलुवकु पोन्दरानट्टि गुरु भक्ति आनन्दमु – नी
यन्दु करुणिञ्चनण्टे तोचलेदिक नेनु यन्दुकु विचारपडेदवु गोविन्दयनिपलुकवलने गानि ॥
३. वञ्चनलेक गोपालकृष्ण नामामु कीर्तिञ्चिन विनितानालिञ्चिन प्रेम ।
मिञ्चि श्रीधर वेङ्कटेश्वर महिमविनुतिञ्चगनु आहरुनि मै पुळकिञ्चिनदि एमो
मीके तेलुसुनु गानि ॥

| राग : भैरवि | ताळम् : त्रिपुट |
|---|---|

प. मनसा श्रीधर वेङ्कटेश्वरगुरुनि महिमलु दलचु कोम्मि ॥
अ. मुनु नीवु चिरकालमुनु श्री हरिकीर्तन जेसिनन्दुकु फलमनुचु इदे परमतारकमनि ॥
१. कलि कल्मषमुलेल्ल दीरु निन्नु कलग जेसेडु मायनु चालबोरु–बहु
सुलभमुग भक्ति मीरु इदि सुखम्बनि मरेवरुनु तेलियलेरु नीवु कोरु तेलिय ॥
२. दिनदिनमुनु नीवे जेरि वारि दिव्यश्री चरणमुलने कोरि मेटि
धनमु चैयच्चिनदारि –ई दोरतनमु नीवे कोळ्ळलाडि सारे ऐमारियुण्डग ॥
३. आपदलणचु दैवम्बु–श्रीधरार्य वेङ्कटेश्वर रूपम्बु–बुनि
तापहेतुवौ अज्ञानम्बु–बोगोट्टि हितवुग नीयन्दु प्रेम निवासम्बुग निरतम्बु जेयु ॥
४. श्रीपतियगु मा गोपालकृष्णनि चिन्तिञ्चगनु गुरुभक्ति एवेळगलुगु नीपट्ल
दैवानुकूलमैयुण्डुनु निजमुगा नम्मु मी संशयमेलनिक नीलोन मेलुकोवे ॥

| राग : कल्याणि | ताळम् : आदि |
|---|---|

प. विण्टिरा जनुलारा श्रीधर वेङ्कटेश्वर श्रीगुरु महिमलु ॥
अ. मुक्कण्टि देवुडु मनयन्दु साक्षात्करिञ्चि नररूपं ओन्दिन कथलु ॥
१. रामनाममु नोडुवुचु नियतमुग नारदादि योगेन्द्रुलवलने
प्रेमनिञ्चि भक्तिजेयु पेद्दल प्रियमुजेसि भाषिन्तुरु

-------------------------------------------------------------------

भुमिलो मनवण्टिवारलकु बोधिम्पुमु तण्ड्रियनुचु वेडिन
श्री मनोहरुनि नामं उपदेशिन्तुरु ओ धन्युलैन मीरुलु ॥

२. सावधनमुग विनुडि मा गुरुस्वामि चरितमेल्ल विनिन
मी भावमन्दु तनकुतानै पूर्ण भक्तिनिण्डि मनसु चल्लनौनु
पावनम्बगु नी मनसुनन् अतनि पादमुलोकटि जेसु कोनि कुल–
दैवतारदनम्बु जेयुडि सन्देहमेन्तैन तोचवलदिक ॥

३. भवुनिनाममु भवुनियडल तत्परुलयन्दु प्रेमयुनोनर मा–
धवुनि वार्तलन्दन्य वार्तल विरक्तुलै युन्दुरु
भावमुननु गोपालकृष्णुनि भजनजेयुचुण्डु वारल
ब्रोतुरु श्रीधर वेङ्कटेश्वरुलनुचु निपुडु ई वसुधलो ॥

| राग : कल्याणि | ताळम् : रूपक |
|---|---|

प. मनसु पोयिन त्रोव पोनीयनि विडिचिते नेम्मदि एट्ल पुट्टनय्या ।
अ. घुनुलगु श्रीधर वेङ्कटेश्वर श्रीगुरुमूर्तिनि अनयमुदलचेडु भक्तुलेवरु वारोकरुविना ॥
१. पशुवृत्तिनि जेन्दिन दुःखमुले सुखमुलनि दुर्दश चेतनु भोगिञ्चिन मनसु ई
दशनैननु शिव शिव शिवायनि गुरुमूर्तिनि पशुपतिनि सभापतिनि भजिञ्चनि नरपशुवले ना ॥
२. एन्नेन्निविधमुल विषयसुख परम्परलनु गनि अन्ननियु तोचलेकने मनसु मरिमरि
कन्नुलगनि अलमेकल कैपडि भोगिञ्चिन कडकु इन्नियु क्षणभङ्गुरमनि एञ्चक नरपशुवले ना ॥
३. ज्ञानाज्ञानम्बुनन् उत्तम जन्ममु गल शिव रसिकुललो ज्ञान रसमु वेतकु वारोकरु विना मरि
गानमु अन्तटि रसिकुलु कद्दनि दोरिकियुवलदनि श्वानरतिसुखमु गनि आसैन नरपशुवलेना ॥
४. अनयुमु गोपालकृष्णुनि भजनमु जेयुट कण्टे श्रीगुरुनाम स्मरणमे क्षिप्रफलन्बिनि
मनसु भजिञ्चिन नेम्मिदि बुट्टनु आयुर्वृद्धियु सम्पद कद्दिनि
तेलिसियु तेलियनि नरपशुवले ना ॥

| राग : | ताळम् : आदि |
|---|---|

प. श्री गुरु श्रीधर वेङ्कटश प्रभो माकु नी दय कावल । शिव नाम परायण ।
१. बागुगने इललो परशिवनामं अमृत भक्तुलके वोसगि परगति जूपिन ।
२. यति बोधेन्द्रुल नातुणितो कलसि सततमु नाम प्रचारमु जेसितिवि ।
३. नदि गङ्गा ना इण्टि बाविलोन पिलचि नरुलकु नी महिम देलिय जेसितिवि ।
४. पन्नग विधिनुत पवित्र मद्यार्जुन सन्निधि लोन ज्योति रूप नैतिवि ।
५ शिष्यकोट्टुलकु चिन्मयमैतिवि दक्षराज पूजित शिव अंशमैतिवि ।

---

## नामावळि

१. गङ्गाधर गङ्गाधर गङ्गाधर हरहर ।
२. नटेशनामात्मक श्रीधर वेङ्कटेश गुरुमीडे ।
३. हर बोलनाथ उमापते शम्भो शङ्कर पशूपते ।
नन्दी वाहन नागभूषण चन्द्रशेकर जठाधर । शूलादार ज्योतिप्रकाश विभूति सुन्दर परमेश ।
कैलासवास कनसबेश गौरिमनोहर विश्वेश । स्माशनवास चिदम्बरेष नीलकण्ठ महादेव ।
डं डं डं डं डमरुनाद पार्वतिरमण सदाशिव । गङ्गाधरहर गौरिमनोहर गिरीजकान्त सदाशिव ।
४. शिवाय परमेश्वराय शषिशेखराय नम ॐ । भवाय गुण सम्भवाय शिव ताण्डवाय नम ॐ ।
शिवाय त्रिपुरान्तकाय शिव शङ्कराय नम ॐ । हराय गिरिजावराय भवभन्दिताय नम ॐ ।
शिवाय सर्वेश्वराय मृत्युञ्जयाय नम ॐ । हराय अहि भूषणाय गुह वन्दिताय नम ॐ ।
५. हे शिव शङ्कर नमामि शङ्कर शिव शङ्कर शम्भो ।
हे गिरजापते भवानि शङ्कर शिव शङ्कर शम्भो ।
६. शिव शम्भो हर हर शम्भो । भव नाश कैलासनिवास ।
पार्वतीपते हरे पशुपते । गङ्गाधरा शिव गौरीपते ।

**श्रीधर वेङ्कटेश गुरुमूर्तिकी – जय**

## श्री सद्गुरु स्वामिगळु

यस्याङ्गं कनकाभकामसदृशं फालं त्रिपुण्ड्राङ्कितम्
वाणी श्रीरघुनाथानामसुधयापि आर्द्रा असकृद्धारया ।
चेतसि अम्बुजलोचनोयदुपतिः खेलत्यलं राधया
तं वै वेङ्कटराम देशिकवरं सर्वात्मनाहं भजे ॥

| राग : सहाना | ताळम् : आदि |
|---|---|

प. भजे सद्गुरुं अनिशम् भजे सद्गुरुं गुरुराजमनिशम् ।
१. तेजसाब्जहितकरतुल्यं दिव्यभव्यगुणपरिपूर्णम् ।
राजशेखरमिव स्थितमखिलो–द्धरण निमित्तं भुवमवतीर्णम् ॥
२. कन्धराक्ष तुळिसीमालं स्कन्धलम्बिताक्षयपात्रम् ।
करवीणं सुविशालवक्षसं कनकनिभं तं मृदुतर गात्रम् ॥
३. पृष्ठलम्बिनामांशुका वेष्ठितशिरसं बहुसरसम् ।

पुण्ड्रालिकवर नासकपोलं पुण्डरीकनयनं मृदुहासम् ॥
५. इन्दुबिम्बसमसुच्छत्रं नन्दनीय मद्दळ गानम् ।
सुन्दर चामर केतन काञ्चन दण्डधारि सन्नुत धामानम् ॥
५. विष्णुविधीशस्वरूपिणं विज्ञानद पादुकचरणम्
कृष्ण पदाम्बुज बम्भर राधाकृष्णदासवर मानससदनम् ॥

| राग : शङ्करभरण | ताळम् : छापु |
|---|---|

प. चिन्तय रे सद्गुरुं सन्ततं चिन्तय रे सद्गुरुं सन्ततम् ।
अ. कामसदृश कनकाभशरीरं काममोहमदखण्डनधीरम् ।
१. रामनामविलसन्मुखकमलं रामचन्द्रमिव विश्रुतममलम् ।
कन्धरशोभित वरमणिमालं कञ्जदृशं भस्माङ्कितफालम् ॥
२. उत्तामाङ्गधृत हाटकचेलं उत्तमभक्तानां अनुकूलम् ।
वामाकराङ्गुलि वृतजपसूत्रं वामाबाहु विधृताक्षयपात्रम् ॥
३. पादलसित मणिपादुकाद्वयं पादरजःकणः भर्जितामयम्
नरवरमुनिगण साधुसमेतं नरवरदासनुतं भवपोतम् ॥

| राग : शङ्करभरण | ताळम् : आदि |
|---|---|

प. भजरे गुरुचरणं दुस्तर भवसागर तरणम् ।
१. मरुदानल्लूर् गुरुपतिचरणं मिरयपापतिमिरसूर्यकिरणम् ।
२. मरुदानल्लूर् गुरुपतिरूपं करुणाकरं खण्डित भवतापम् ।
३. मरुदानल्लूर् गुरुपतिबोधं हरिजनाश्रितवैरिशासनक्रोधम् ।
४. मरुदानल्लूर् अनुपुरवासुलु निरतमु वेङ्कटविठलुनि दासुलु ।

| राग : धन्यासि | ताळम् : आदि |
|---|---|

प. अतडे परब्रह्मम्बनि मदिलो अनुदिनमुनु गनुडि ।
अ. अतिप्रीतिग मदनान्तकपुरमुन स्थितुडै नेलकोनि पतितुल ब्रोचिन ।
१. रामकृष्णशिव नाममु जेयुचु रञ्जिल्लग भुविनि, पामरुलकु सत्पथमुनु जूपुचु बागुग कृपबूनि ।
प्रेममीर निजदासदीनुलकु, कामितफलमुनु घनमुग नोसगिन ॥
२. तारकमन्त्रंबु येरुगनि नरुलकु तापं बणगिञ्चि घोरमैन भववारिधि दाटग गोविन्दुनि गनिपिञ्चि ।

---

श्रीरामुनि नामामृतपानमु जेयुचु दासुल भवमेडलिञ्चिन ॥
३. वेङ्कटरामदेशिकवरुलै विश्वम्बुन वेलसि पोङ्कमुगा श्रीहरिपदमुलगनि पूल पूजजेसि ।
शङ्कदीर्चि श्री बालगणेशुनि, सङ्कटमुलु तोलगिम्पग जेसिन ॥

| राग : भैरवि | ताळम् : आदि |
|---|---|

प. सद्गुरुमेव सदाऽहं संस्मारमि सन्ततम् ।
अ. सद्गुरु शिष्य जगद्गुरु वर परिषद्गुरुनाथ अस्मद्गुरु मनिषम् ।
१. परिजनेक्षणाळिवृत मुखाब्जं भजनसुखाञ्चित नयनाब्जम् ।
हरिहरैक सिद्धान्त निरतं सरदीश्वर नामामृत मत्तम् ॥
२. वामकराङ्गुष्टवृत सूत्रं नाम गणनचर करशाखम् ।
सोमशुभ्र वसनोपवीतं कामदाङ्घ्रि कमलं श्रितानाम् ॥
३. आसीनं वृद्ध मृग चर्मणि निजदासावन दक्षाङ्ग चयम् ।
वासायित राधाकृष्णहृदं दासायित भूसुर वर देहम् ॥

**नामावळि**

१. मानस भजरे गुरुचरणं दुस्तर भवसागर तरणम् ।
२. गुरुचरणं भज चरणं सद्गुचरणं भवहरणम् ।
३. मरुदानल्लूर् सद्गुरु चरणं ममताहरणं भज शरणम् ।
४. सद्गुरो पाहिमां परमदयळोपाहिमाम् । सद्गुरो पाहिमां परमकृपळोपाहिमाम्
५. सद्गुरो हरे जय सद्गुरो हरे । सद्गुरो जय सद्गुरो जय सद्गुरो जय सद्गुरो ।
सद्गुरो सद्गुरो सद्गुरो जय सद्गुरो ।

**जय सद्गुरु स्वामिकी – जय**

**श्री बोधेन्द्ररु, श्री अय्यावाळु, श्री सद्गुरु स्वामिगळु मुव्वरु सेरिद ध्यान**

| राग : बेहाग | ताळम् : आदि |
|---|---|

प. गुरुमौळिमणे भजे भवन्तम् । शरणागत चिन्तामणे ।
१. कल्याणं मयि कलय मुनीन्द्र । तुल्यविभव बोधेन्द्र यतीन्द्र ॥
२. साधुजन श्लाघित सत्कीर्ते । श्रीधर वेङ्कटकुलगुरु मूर्ते ॥
३. अङ्कित हरिनाम वागभिराम । शशाङ्कवदन श्री वेङ्कटराम ॥

४. खण्डित मानस शत्रुस्तोम । पण्डितपूजित कोदण्डराम ॥
५. नामब्रह्म परायणसिंह । पामरजन पावन नरसिंह ॥

## नामवळि

१. गुरु महाराज गुरु जय जय परब्रह्म सद्गुरु । गुरु महाराज गुरु जय जय बोधेन्द्र सद्गुरु ।
गुरु महाराज गुरु श्रीधर वेङ्कटेश सद्गुरु । गुरु महाराज गुरु जय जय वेङ्कटराम सद्गुरु ।

चारि मुक्ती दायक दाता उदार कल्पतरु । रूप जयाचे मनबुद्धिपर वाचे अगोचरु ।
अलक्ष्य, अनाम, अरूप, अद्वय अक्षय परात्परु । आत्मिराम रामदास गोपाल करुणाकरु ।

## श्री दत्तात्रेय

माला कमण्डलुधरःकरपद्मयुग्मे मध्यस्थपाणियुगले डमरुत्रिशूले ।
यस्यस्थ ऊर्द्वकरयोः शुभ शङ्ख चक्रे वन्देतम अत्रिवरदम् भुजषठ्कयुक्तम् ॥

| राग : | ताळम् : आदि |
|---|---|

१. तीन शिरे सहा हात, तया माझा दण्डवत ।
२. माथां शोभे जटाभार, आङ्गी विभूतीं सुन्दर ।
दिगम्बर दिगम्बर दिगम्बर दिगम्बर ।
३. काखीं झोळी पुढें श्वान, नित्य जान्हवीचे स्नान ।
दत्तात्रेय दत्तात्रेय दत्तात्रेय दत्तात्रेय ।
४. शङ्ख चक्र गदा हाती, पयी खडावा गर्जती ।
अवधूत अवधूत अवधूत अवधूत ।
५. तुका म्हणे दिगम्बर, तया माझा नमस्कार ।
दत्तगुरु दत्तात्रेय दिगम्बर अवधूत ।

| राग : | ताळम् : आदि |
|---|---|

प. हा! परमसनातन विश्व भरुनि उरला । गुरु दत्तराज ऋषिकुळान्त अवतरला ।
१. स्मितरम्यवदन काषाय वसनधारी । पीयुषयुक्त करीं रत्नजडित झारी ।
निजभक्त त्राण कारणीं शूल धरिला । गुरु दत्तराज ऋषिकुळांत अवतरला ।
२. बांधिला कोप मुरडून् जटा मकुटीं । घातली दया वनमाला दिव्य कंठीं ।
करधृत डमरूं तुनि उपजती ज्ञानकला । गुरु दत्तराज ऋषिकुळांत अवतरला ।

३. मृगचर्म पांघरी शङ्खचक्र हाती । श्रुति श्वानरूप होवुनी पुढें पळती ।
भूधेनु कलिभयें चाटित चरणाला । गुरु दत्तराज ऋषिकुळांत अवतरला ।
४. करी स्वजन उपाधि भस्मलेप अङ्गा । झोळींत भरी तज्जन्म मरण पिङ्गा ।
नारायण हृदयिं रङ्गभरुनि गेला । गुरु दत्तराज ऋषिकुळांत अवतरला ।

| राग : | ताळम् : |
|---|---|

प. भवतारक ह्या तुझ्या पादुका वन्दिन मी माथां । करावी कृपा गुरुनाथा ।
१. अनीवार हें मन बहु माझें चरणीं स्थिर व्हावें, तव पदीं भजनीं लागावेम् ।
कामक्रोधादिक हे षड्रिपु समूळ छेदावे, हेंचि मागणें मला द्यावे ।
चाल – अघहरणा करी करूणा दत्ता धाम्वपाव आतां करावी कृपा गुरुनाथा ।
२. तूंचि ब्रह्म तूंचि विष्णु तूंचि उमाकान्त तूंचि समस्त दैवत ।
माता पिता तू इष्ट बन्धु तूंचि सर्व गोत, तूंचि माझें सकळ तीर्थ ।
चाल – तुजविण मी गा कांहींच नेणे तूंचि कर्ता हर्ता, करावी कृपा गुरुनाथा ।
३. तन मन धन हें सर्व अर्पुणी कुरवंडिन काया, उपेक्षऊ नको गुरुराया ।
कर्महीन मी मतीहीन मी सकळां श्रमवाय, लज्जा राखे गुरु सदया ।
चाल – मातृबाळकांपरि सांभाळी तूंचि मुक्तिदाता, करावी कृपा गुरुनाथा ।
४. शेषा ब्रह्मा वेदा न कळे महिमा तुझा थोर, काय वर्णू मी पामर ।
वियोग नसाव तव चरणांच हाचि देई वर, शिरीं ठेवी अभयकर ।
हीच विनन्ति दर्शन द्यावें दसासी आतां, करावी कृपा गुरुनाथा ।

| राग : | ताळम् : त्रिपुट |
|---|---|

१. श्रीदत्तराज कृपाळु भज मन जनन मरण विनाशकम् ।
शोकमोह विनाशकर कैवल्यपद वरदायकम् ॥
२. जटाजूट शिरिं कटिं सूत्रकौपीन स्फटिकमालविभूषितम् ।
आजानुबाहु कमण्डलादि श्रीदण्डधृतकरशोभितम् ॥
३. भस्मलेपन भूषिताङ्ग विशालफालसुलोचनम् ।
सुहास्यवदन प्रशान्त सदन श्रीनाशिकान्त कृतेक्षणम् ।
४. चरणप्रपद श्री अरुणयुत निजतरणीसमप्रभया युतम् ।
बरभक्तहृदय तमोपहार श्रीशान्तपदवरदायकम् ॥
५. प्रातरुत्थित ध्यान सहजानन्द हृदय विलासितम् ।
छन्दगुरुपदद्वन्द्व युगलारविन्द सततं नमाम्यहम् ॥

## नामवळि

१. गुरु दत्तात्रि अवधूत जनार्दन स्वामि एकनाथ ।
२. दत्तगुरो दत्तगुरो दत्तात्रेय अवधूत गुरो ।
३. श्रीगुर दत्ता जयगुरु दत्ता अनसूय नन्दन ॐ – अनसूय नन्दन ॐ ।
४. दिगम्बर दिगम्बर श्रीपादवल्लभ दिगम्बर ।
५. दत्तं भजे दत्तं भजे अत्रि अनसूयपुत्र दत्तं भजे ।
६. दत्त दिगम्बर दत्त दिगम्बर दत्तात्रेय नमो नमो ।
श्रीपाद वल्लभ दत्ता, अवधूता नमो नमो ॥
७. दिगम्बर हरि जटाधरा शिवशङ्कर तुजला नमो ।

**जय दत्तात्रेय अवधूत स्वामिकी – जय**

## श्री पुरन्दरदासरु

मन्मनोभीष्टवरदं सर्वाभीष्ट फलप्रदम् । पुरन्दरगुरुं वन्दे दासश्रेष्टं दयानिधिम् ।

| राग : मोहन | ताळम् : आदि |
|---|---|

प. गुरु पुरन्दर दासरे निम्म, चरणकमलव नम्बिदे ।
अ. गर्व रहितनमाडि एन्ननु पोरेव भारवु निम्मदे ।
१. ओन्दुअरियद मन्दमतिनानु, एन्दु निम्मनु वन्दिपे ।
इन्दिरेशन पादव तोरिसो तन्दे माडलु सत्कृपे ॥
२. मारजनकन सन्निधानदि सारगानव माडुव ।
नारदादिरूपदिन्दलि चारु दर्शन तोरिदे ॥
३. पुरन्दरालय घट्टदोळु नी नुरुत धनव गोळिसलु ।
परम पुरुष विप्रदिन्दलि करव नीडी याचिसे ॥
४. परम निर्गुण मनवनरिदु सर्व सूरयु गोळिसिद ।
अरिदु मनदलि जरिदु भवगळ तरुणिसह होर होरटनु ॥
५. अज भवादिगळिगरसनाद विजय विठलन ध्यानिप ।
निज सुज्ञानव कोडिसबेकेन्दु भजिपेनो केळु गुरुवर ॥

ना. श्री गुरो जय गुरो पुरन्दरार्य सद्गुरो ।

---

## सद्गुरु पुरन्दरदास स्वामिकी – जय

### श्री राघवेन्द्र स्वामि

पूज्याय राघवेन्द्राय सत्य धर्म रताय च । भजतां कल्पवृक्षाय नमतां कामधेनवे ॥

| राग : भैरवि | ताळम् : आदि |
|---|---|

प.	करुणिगळोळगेणे काणेनु निन्हागे सत् – गुरुवर्य राघवेन्द्र ।
अ.	चरणकमलगळ मोर होक्क सुजनर हरिकेय निरुतदिवे नी कावे ।
१.	राघवेन्द्र गुरुवे गतिएन्दु रागदिन्दलि भजिपे ।
	भागवतर दुरितौघगळळिदु चन्नागि सन्तैसुवे नी सन्मौनि ॥
२.	सुधीन्द्र यतिकर पदम सम्भव मधुवध पदाम्बुज मधुप ।
	त्रिदश भूरुहदन्ते बुधजनरिच्छिद ओदगि पालिसि पोरवे अस्मद्गुरुवे ॥
३.	कुदर देवन दिव्यरदनदि जनिसिद नदिय तीरदि शोभिप ।
	सदमल भनवन्त्र सदन निलय जित वदनश्री जगन्नाथविठलनदूत ॥

| राग : बेहाग | ताळम् : आदि |
|---|---|

प.	रोगहरणे कृपासागर श्रीगुरु राघवेन्द्र परिपालिसो ।
१.	सन्तत दुर्वादि ध्वान्त दिवाकर सन्त विनुत मतलालिसो ।
२.	पावन गात्र सुदेवपरने तव सेवकजनरोळगाडिसो ।
३.	घन्न महिम जगन्नाथ विठलप्रिय निन्नराधने माडिसो ।

| राग : षण्मुखप्रिय | ताळम् : आदि |
|---|---|

प.	करदरे बर बारदे गुरु राघवेन्द्र करदरे बर बारदे ।
१.	वरमन्त्रालय पुरमन्दिर तव चरणसेवकरु करवमुगिदु ।
२.	हरिदासरु सुस्वर सम्मेळदि परवशदलि बायि तेरेदु कूगि ।
३.	पोशरपित कमलेश विठलन दासग्रेसरु ई समयदलि ।

---

| राग : भैरवि | ताळम् : आदि |
|---|---|

प. तुङ्गा तीरविराजं भजमन । राघवेन्द्र गुरुराजं भजमन ॥
अ. मङ्गळकर मन्त्रालयवासम् । श्रुङ्गारानन विलसितहासम् (राजितहासम्) ॥
१. करदृत दण्ड कमण्डलु मालम् । सुरुचिर चेलं धृत मणिमालम् ॥
२. निरुपम सुन्दर कायं सुशीलम् । वरकमलेशार्पित निजसकलम् ॥

| राग : तिलाङ्ग | ताळम् : आदि |
|---|---|

प. भज भज मानस राघवेन्द्रं, गुरु राघवेन्द्रं यति राघवेन्द्रम् ।
अ. तुङ्गा नदी तीरं पुण्यस्थल वासम् । मन्त्रालय क्षेत्रं बृन्दावन वासम् ॥
१. दीन जन प्रिय गान रस पूर्णम् । प्रह्लाद अवतारं किञ्चित रूपम् ॥
२. फाल्गुण सङ्गम गुणशील नामम् । मृतिक कलियुग परम औशदम् ॥

ना. श्री गुरुदेव शरणं शरणम् । श्री राघवेन्द्र शरणं शरणम् ।
आनन्दतीर्थ शरणं शरणम् । आश्रितरक्षक शरणं शरणम् ।

२. राघवेन्द्रं भजरे राघवेन्द्रम् । तुङ्गा तीरविहार राघवेन्द्रम् ।
राघवेन्द्रं भजरे राघवेन्द्रम् । मन्त्रालय पुरवास राघवेन्द्रम् ।

**जय राघवेन्द्र सद्गुरु स्वामिकी – जय**

## श्री सदाशिव ब्रह्मेन्द्र स्वामि

परम शिवेन्द्र कराम्बुज सम्भूताय प्रणमृ वरदाय ।
पदधूत पङ्कजाय प्रणतिं कुर्मः सदाशिवेन्द्राय ॥

| राग : मलयमारुत | ताळम् : त्रिपुट |
|---|---|

प. नी पाद दर्शनमु निखल पाप कर्शनमु ।
अ. श्री पार्वती शान्त श्री सदाशिव ब्रह्मेन्द्र ।
१. मलय मारुतलोल माकन्द वनमुलोन ।
वेलयु श्री तरमुलमुन मेरयु नाद ब्रह्ममा ॥

२. तोलि जेसिन सुकृत फलमु दोरकिनावु विडुव जाल ।
नेलकोनरा मिसुकृष्ण हृदय दहर निलय सदय ॥

| राग : शङ्कराभरण | ताळम् : आदि |
|---|---|

प. हंसोहं सोहं परम ।
अ. हंसस्सोहं अमृत मयोहं श्री सदाशिव ब्रह्मेन्द्रोहम् ।
१. नित्य निरञ्जन निर्विकल्पोहं निर्मल बोधानन्द घनोऽहम् ॥
२. सत्य सुखात्मक सर्व चरोहं शान्त मीसुकृष्ण स्वान्त घनोऽहम् ॥

ना. सद्गुरु नाथा सदाशिवेन्द्र सज्जनविनुत मां पाहि ।

**श्री सदाशिव ब्रह्मेन्द्रुलकु – जय**

**श्री त्यागराज स्वामि**

राम ब्रह्माख्य विप्रेन्द्र सुपुत्रं लोकविश्रुतं नाम सङ्कीर्तन ध्यान पूजनासक्त मानसम् ।
कामक्रोधादि रहितं रामभक्त शिरोमणिं त्यागराज गुरुं वन्दे सङ्गीताब्धि कलानिधिम् ॥

| राग : विजय नागरि | ताळम् : आदि |
|---|---|

प. नाद ब्रह्ममे श्री त्यागराज ।
अ. वेद धर्मत्ते सङ्गीतमाय पोळिवन्द ज्योतिये ज्ञान वादिधिये सद्गुण ।
१. कलैयाले मुक्ति परलामेनवे कण्डु मान्तर्करुळ् काट्टिना इसै ।
कलैइन् उरुवे कारुण्य गुरुवे कळिहल् पणिन्देन् नान् करुणैसैकोवे ॥

| राग : नाद ब्रह्म | ताळम् : आदि |
|---|---|

प. नादब्रह्म अनुरागमे नरवारुलौ सायुज्यमे ।
अ. वेदान्तसार विद्याकर सङ्गीतचार्य श्री त्यागराज ।
१. भवतारक ब्रह्ममौ राम भक्तियोग सुदा पानभिराम ।
श्री वाल्मीकि अवतारुडौ मिसु कृष्णानन्दाम्बुधि सोम ॥

ना. दीन दयापर गुरुमूर्ते त्यागराज सद्गुरु कीर्ते ।

**श्री त्यागराज स्वामुलकु – जय**

ना. गुरुवर्य चरणारविन्दं भजामि । गुरुवर्य गोपालकृष्णं भजामि ।
भावान्तरङ्गंतरङ्गं भजामि । नामामृत पानलोलं स्मारमि ।
श्री नारसिम्ह स्वरूपं भजामि । मीनाक्षिसुतनित्य विनुतं नमामि ।

**सद्गुरु गोपालकृष्ण मूर्तिकी – जय**

## इतर गुरु कीर्तनेगळु

ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्तिं द्वन्द्वातीतं गगन सदृशं तत्वमस्यादे लक्ष्यम् ॥
एकं नित्यं विमलमचलं सर्वधी साक्षिभूतं भावतीतं त्रिगुण रहितं सद्गुरुं तं नमामि ॥

| राग : नादनामक्रिय | ताळम् : आदि |
|---|---|

प. ब्रह्मैवाहं खिल सद्गुरु कृपय ।
१. ब्रह्मैवाहं खिल गुरु कृपय चिन्मयबोधानन्द घनं तत् ।
२. श्रुत्यन्तैक निरूपितमतुलं सत्यसुखाम्बुधि समरसमनघम् ।
३. कर्मा (अ) कर्मा विकर्म विदूरं निर्मल संविदखण्डमपारम् ।
४. निरवधि सत्तास्पद पदमचरं निरुपम महिमनिनिहितमनीहम् ।
५. अशापाश विनाशन चतुरं कोशपञ्चकातीतमनन्तम् ।
६. कारणकारण मेकमनेकं काल (अ) काल कलिदोष विहीनम् ।
७. अप्रेमय पदमखिलाधारम् निष्प्रपञ्च निज निष्क्रियरूपम् ।
८. स्वप्रकाशशिव मद्वयमभयम् निष्प्रतर्क्यमनपायमकायम् ।

| राग : आनन्दभैरवि | ताळम् : रूपक |
|---|---|

प. मानस गुरु गुह रूपं भजरे मायादय हृद्कार्यं त्यजरे ।
अ. मानव जन्मनि सम्प्राप्तीसति परमात्मनि निरतिशय सुखं व्रजरे ।
१. स्वच गुणोपादि सहित सदाशिवं स्वविद्या समेत जीवोद्भवम्
तत्वं तामस युत विश्वमैभवं तारकेश्वरं आनन्द भैरवम्

---

नित्व श्री गुरु चरणं कृत्वा नामस्मरणं जेत्व मोहावरणं मत्वा तदेक शरणम् ॥

ना. अखण्ड गुरुवरमद्वयमाश्रय आनन्दं ब्रह्मानन्दम् ।

**श्री सद्गुरु स्वामिनः – जय**

| राग : कानड | ताळम् : आदि |
|---|---|

१. कौन बतावे बाट गुरुबिन बडा बिकट यमघाट गुरुबिन ।
२. भ्रान्तिकि पहाडि नदियाबिचमों अहङ्कारकी लाट गुरुबिन ।
३. कामक्रोध दो पर्वत ठाडे लोभ चोर सङ्गात गुरुबिन ।
४. मद मत्सरके धारा बरसत माया पवन घन दाट गुरुबिन ।
५. कहतकबीरा सुनोमेरे दुनिया क्यों कर्ना भो बाट गुरुबिन ।

| राग : सिन्धु भैरवि | ताळम् : आदि |
|---|---|

प. मोरि लागि लटक गुरु चरणनकी ।
१. चरण बिना मुझे कछुनहीं भावै झूठ माया सब सपननकी ।
२. भवसागर सब सूख गये है फिकिर नहीं मुझे तरणनकी ।
३. मीराके प्रभु गिरिधर नागर उलट भयि मोरे नयननकी ।

| राग : भीम प्लास | ताळम् : आदि |
|---|---|

प. आज सखि मेरे सद्गुरु घर आये मेरे मनमे आनन्द भयोरे ।
१. दर्शनसे सब पापविनाशे दुःख दरिद्र सब दूरगयोरे
अमृत वचन सुनत तम नाश्योरे घटभीतर प्रभु पायलयोरे ।
२. जन्म जन्मका सम्शयटूटे भवभय ताप मिठायि लयोरे
ब्रह्मानन्द दास दासनको चरण कमल लिपटायि लयोरे ।

ना. बरसत बरसत सद्गुरु कृपा पियो पियो प्यार मन निशिदिन सार ।
आनन्द आनन्द आनन्द ही मेरा नचो गवो राधाकृष्ण अरणमीरा ॥
ना. पाडुवोमे पेरानन्दमुडने नाम् सद्गुरु पाद मलर् शुडेडुवोम्
कूडि आडि कोण्डाडुवोमे गुरुनाथ गुरुनाथ एन्रि कोविडुवाम् ।

---

**जय बोल श्री गुरु चरणाविन्दकी – जय**

| राग : | ताळम् : |
|---|---|

१ त्रिविध तापासि हारक हे गुरुपाय । भव सिन्धुसि तारक हे गुरुपाय ॥
२. स्वात्म सूखाच्ये बीज हो हे गुरुपाय । ज्ञाना चे निज गुज हो हे गुरुपाय ॥
३. भक्ति पन्थासि लाविती हे गुरुपाय । नयनीं रघुवीर धाविती हे गुरुपाय ॥
४. सहज शान्तिचे आगर हे गुरुपाय । पूर्ण कृपच सागर हे गुरुपाय ॥
५. रामदासचे जीवन हे गुरुपाय । सकळ जीवसि पावन हे गुरुपाय ॥

| राग : | ताळम् : |
|---|---|

१. सद्गुरु ने माझे आशिर्वाद दीला । हरुष बरला हृदयी माझे ॥
२. हृदयीञ्च भाव कळला गुरुसि । आनन्द उल्लसि बोले माझे ॥
३. बोले माझे गुरु कृपातो करुनि । तुका म्हणे मानीं आनन्दलो ॥

| राग : | ताळम् : |
|---|---|

१. श्रीगुरुसारीखा असतां पाठिराखा । इतराञ्चा लेका कोण करी ॥
२. राजायची कान्ता काय भीक मागे । म्हणोनिया जोगे सिद्धि पावे ॥
३. कल्पतरु तळवटीं जो कोणि बैसला । काय वाणी त्याला साङ्गिजोति ॥
४. ज्ञानदेव म्हणे तरलों तरलों । आतां उद्धरलों गुरुकृपेम् ॥

ना. सच्चिदानन्द गुरु सच्चिदानन्द ।
२. प्रकाश हो सुप्रसन्न हो । प्रियवर गुरु परन्धां मेरा ।
प्रियवरगुरुवर परन्धां कि मै । बार बार करूं प्रणाम्
३. मनमे प्रेम भरो गुरुका ध्यान करो । गुरुका ध्यान करो सद्गुरुका चरण रषे

**जय बोलो सद्गुरु मण्डलिकी – जय**

**श्री साधुगळ मत्तु अवर पादधूळिय महिमे**

------------------------------------------------------------------------

१. शान्ताः महान्तो निवसन्ति सन्तः वसन्तवत् लोक हितं चरन्तः ।
तीर्णः स्वयं भीम भवार्णवं जनान् अहेतुना अन्यानपि तारयन्ति ॥
२. निरपेक्षं मुनीं शान्तं निर्व्येरं समदर्शनम् । अनुव्रजाम्यहं नित्यं बूयेयेत्यङ्घ्रिरेणुभि ॥
३. नह्यम्मयानि तीर्थानि नदेवामृच्छिलामयाः । तेपुनन्त्यु रुकालेन दर्शनादेव सधवः ॥
४. तुलयाम लवेनपि नस्वर्गं नापुनर्भवम् । भगवत्सङ्गिं सङ्गस्य मर्त्यानां किमुताशिषः ॥
५. मार्गो मार्गो जायते सधु सङ्गः । सङ्गे सङ्गे श्रूयते कृष्ण कीर्तिः ॥
कीर्तौ कीर्तौ नस्तदाकार वृत्तिः । वृतौ वृतौ सच्चिदानन्द दासः ॥

सन्त पदाचि जोट दे रे हरि । साधु पदाचि जोट दे रे हरि ॥
१. सन्त समागमें आत्मसुखाच । सुन्दर उघेवे मोट दे रे हरि ॥
२. सुफलित करुनि पूर्ण मनोरथ । पुरविसि जीविचीं गोट दे रे हरि ॥
३. अमृतम्हणे रे हरि भक्ताञ्च । सेवट करिसी कोट दे रे हरि ॥

ना. सन्तोङ्कि जय जय भक्तोङ्कि जय जय । गुरोङ्कि जय जय गोविन्द जय जय ॥

**जय बोलो सद्गुरु मण्डलिकी – जय**

---

## श्री जयदेव कवि विरचित
## श्री गीतगोवन्द महाकाव्य

१. यद्गोपिवदनेन्दुमण्डनमभूत् कस्तूरिका पत्रकम्
यल्लक्ष्मीकुच शातकुम्भकलशे व्याकोशमिन्दीवरम् ।
यन्निर्वाणविधान साधानविधौ सिद्धाञ्जनं योगिनाम्,
तन्न श्यामळमाविरस्तु हृदये कृष्णाभिधानं महः ॥
२. राधामनोरम रमावर रास लीला गानामृतैक फणितिं कविराज राजम् ।
श्रीमाधवार्चनविधौ अनुरागसद्म पद्मावती प्रियतमं प्रणतोऽस्मि नित्यम् ॥
३. श्री गोपालविलासिनीवलयसत् रत्नादि मुक्ताकृतिः
श्री राधापति पादपद्म भजनान्दाब्धि मग्नोऽनिशम् ।
लोके सत्कविराज राज इति यः ख्यातो दयाम्बोनिधिः
तं वन्दे जयदेव सद्गुरुवरं पद्मावती वल्लभम् ॥

**सद्गुरु जयदेव स्वामिकी – जय**

### श्री गीतगोविन्द महाकव्य – प्रथम सर्गः

मेघैर्मेदुरमम्भरं वनभुवः श्यामस्तमालद्रुमैः, नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय ।
इत्थं नन्दनिदेशतश्चलितयोः प्रत्यद्ध कुञ्ज द्रुवं, राधामाधावयोर् जयन्ति यमुनाकूल रहःकेळयः ॥

वाग्देवता चरित चित्रित चित्त सद्मा पद्मावती चरण चारण चक्रवर्ती ।
श्रीवासुदेव रतिकेळि कथा समेतं एतं करोति जयदेव कविः प्रभन्धम् ॥

यदिहरिस्मरणे सरसं मनो यदिविलासकलासु कुतूहलम् ।
मधुर कोमल कान्त पदावलीं श्रुणु तदा जयदेव सरस्वतीम् ॥

वाचः पल्लवयत्युमापतिधरः सन्दर्भशुद्धिं गिरां, जानीते जयदेव एव शरणः श्लाघ्यो दुरूहद्रुतेः ।
श्रुङ्गारोत्तर सत्प्रमेयरचनैराचार्य गोवर्धन, स्पर्धी कोऽपि न विश्रुतः श्रुतिधरो धोयि कविक्ष्मपतिः ॥

### प्रथमाष्टपति – १

| राग : माळव | ताळम् : आदि |
|---|---|

१. प्रळय पयोधिजले धृतवानसि वेदम् । विहित वहित्र चरित्रमखेदम् ।

---

केशव! धृत मीनशरीर जय जगदीश हरे ।
२. क्षितिरतिविपुलतरे तव तिष्ठति पृष्ठे । धरणि धरण किण चक्र गरिष्ठे ।
केशव! धृत कच्छपरूप जय जगदीश हरे ।
३. वसति दशनशिखरे धरणी तव लग्ना । शशिनि कळङ्कळेव निमग्ना ।
केशव! धृत सूकररूप जय जगदीश हरे ।
४. तवकर कमलवरे नखमद्भुत श्रुङ्गम् । दळित हिरण्यकशिपुतनु भृङ्गम् ।
केशव! धृत नरहरिरूप जय जगदीश हरे ।
५. छलयसि विक्रमणे बलिमद्भुतवामन । पदनखनीर जनितजन पावन ।
केशव! धृत वामनरूप जय जगदीश हरे ।
६. क्षत्रिय रुधिरमये जगदपगतपापम् । स्नपयसि पयसि शमितभवतापम् ।
केशव! धृत भृगुपतिरूप जय जगदीश हरे ।
७. वितरसि दिक्षु रणे दिक्पति कमनीयम् । दशमुखमौळिबलिं रमणीयम् ।
केशव! धृत रघुपतिरूप जय जगदीश हरे ।
८. वहसि वपुषि विशदे वसनं जलदाभम् । कलहति भीति मिळित यमुनाभम् ।
केशव! धृत हलधररूप जय जगदीश हरे ।
९. निन्दसि यज्ञनिधेः अहह श्रुतिजातम् । सदय हृदय दर्शित पशुघातम् ।
केशव! धृत बुद्धशरीर जय जगदीश हरे ।
१०. म्लेच्छनिवहनिधने कलयसि करवाळम् । धूमकेतुमिव किमपि कराळम् ।
केशव! धृत कल्किशरीर जय जगदीश हरे ।
११. श्री जयदेवकवेरिदमुदितमुदारम् । श्रुणु सुखदं शुभदं भवसारम् ।
केशव! धृत दशविधरूप जय जगदीश हरे ।

## श्लोकः

वेदानुद्धरते जगन्निवहते भूगोळमुद्बिभ्रते, दैत्यं दारयते बलिं छलयते क्षत्रक्षयं कुर्वते ।
पौलस्त्यं जयते हलं कलयते कारुण्य मतन्वते, म्लेच्छान् मूर्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः ॥

*******************

## द्वितीयाष्टपति – २

| राग : भैरवि | ताळम् : त्रिपुट |
|---|---|

१. श्रित कमलाकुच मण्डल धृतकुण्डल कलित ललित वनमाल ।
प. जय जय देव हरे ॥

------------------------------------------------------------

२. दिनमणि मण्डल मण्डन भवखण्डन । मुनिजन मानस हंस ।
३. काळिय विषधर भञ्जन जन रञ्जन । यदुकुलनळिन दिनेश ।
४. मधुमुरनरक विनाशन गरुडासन । सुरकुल केळि निदान ।
५. अमल कमलदळ लोचन भवमोचन । त्रिभुवन भवन निदान ।
६. जनकसुताकृत भूषण जितदूषण । समर शमित दशकण्ठ ।
७. अभिनव जलधर सुन्दर धृत मन्दर । श्रीमुखचन्द्र चकोर ।
८. श्रीजयदेव कवेरिदं कुरुते मुदम् । मङ्गळमुज्ज्वल गीतम् ।

**श्लोकः**

पद्मपयोधरतटी परिरम्भलग्न काश्मीर मुद्रितमरो मधुसूदनस्य ।
व्यक्तानुरागमिव खेलदनङ्गखेद स्वेदाम्बु पुरं अनुपूरयतु प्रियं वः ॥

*******************

वसन्ते वासन्ती कुसुम सुकुमारैरवयवैः भ्रमन्तीं कान्तारे बहुविहित कृष्णानुसरणम् ।
अमन्दं कन्दर्पज्वर जनित चिन्ताकुलतया वलद्बाधां राधां सरसमिदं ऊचि सहचरी ॥

**त्रुतीयाष्टपति – ३**

| राग : वसन्त | ताळम् : आदि |
|---|---|

१. ललित लवङ्ग लतापरिशीलन कोमल मलयसमीरे ।
मधुकर निकर करम्बित कोकिल कूजित कुञ्जकुटीरे ॥
प. विहरति हरिरिह सरस वसन्ते । नृत्यति युवति जनेन समं सखि । विरहि जनस्य दुरन्ते ।
२. उन्मद मदन मनोरथपथिक वधूजन जनितविलापे ।
अळिकुल सङ्कुल कुसुमसमूह निराकुल वकुळकलापे ॥
३. मृगमद सौरभ रभस वशम्वद नवदळमाल तमाले ।
युवजनहृदय विदारण मनसिज नखरुचि किंशुकजाले ॥
४. मदनमहीपति कनकदण्डरुचि केसर कुसुम विकासे ।
मिळित शिलीमुख पाटल पटल कृतस्मर तूणविलासे ॥
५. विगळित लज्जित जगदवलोकन तरुण करुण कृतहासे ।
विरहि निकृन्तन कुन्तमुखाकृति केतकि दन्तुरिताशे ॥
६. माधविका परिमळमिळिते नव मालिकयातिसुगन्धौ ।
मुनिमनसामपि मोहनकारिणि तरुणाकारणबन्धौ ॥

---

७. स्फुरदतिमुक्त लतापरिरम्भण मुकुळित पुलकित चूते ।
बृन्दावन विपिने परिसर परिगत यमुनाजलपूते ॥
८. श्री जयदेव भणितमिदमुदयति हरिचरणस्मृतिसारम् ।
सरसवसन्त समयवन वर्णनं अनुगत मदनविकारम् ॥

## श्लोकः

दरविदळित वल्ली मल्लि चञ्चत् पराग प्रकटित पटवासैर् वासयन् काननानि ।
इह हि दहति चेतः केतकी गन्धबन्धुः प्रसरदसमबाल प्राणवद्गन्धवाहः ॥

उन्मीलन्मधुगन्धलुब्ध मधुप व्याधूत चूताङ्कुर, क्रीडत्कोकिल काकली कलकलैः उद्गीर्ण कर्णज्वराः ।
नीयन्ते पथिकैः कथङ्कथमपि ध्यानावधानक्षण, प्राप्तप्राणसमा समागम रसोल्लासैः अमीवासराः ॥

*******************

अनेकनारी परिरम्भ सम्भ्रम स्फुरन्मनोहारि विलास लालसम् ।
मुरारिमाराद् उपदर्शयन्त्यसौ सखी समक्षं पुनराह राधिकाम् ॥

## चतुर्थाष्टपति – ४

| राग : पन्तुवराळि | ताळम् : आदि |
|---|---|

१. चन्दन चर्चित नीलकळेबर पीतवसन वनमाली ।
केळिचलन् मणि कुण्डल मण्डित गण्डयुगः स्मितशाली ॥
प. हरिरिह मुग्ध वधूनिकरे विलासिनि विलसति केळिपरे ।
२. पीनपयोधर भारभरेण हरिं परिरभ्य सरागम् ।
गोपवधूरनुगायति काचित् उदञ्चित पञ्चमरागम् ॥
३. काऽपि विलास विलोल विलोचन खेलनजनित मनोजम् ।
ध्यायति मुग्धवधूरधिकं मधुसूदन वदनसरोजम् ॥
४. काऽपि कपोलतले मिळिता लपितुं किमपि श्रुतिमूले ।
चारु चुचुम्ब नितम्बवती दयितं पुलकैरनुकूले ॥
५. केळिकलाकुतुकेन च काचित् अमुं यमुनावनकूले ।
मञ्जुळ वञ्जुळ कुञ्जगतं विचकर्ष करेण दुकूले ॥
६. करतलताळ तरळवलयावलि कलित कलस्वन वंशे ।
रासरसे सह नृत्यपरा हरिणा युवतिः प्रशशंसे ॥

७. श्लिष्यति कामपि चुम्बति कामपि कामपि रमयति रामाम् ।
पश्यति सस्मित चारुतरां अपरां अनुगच्छति वामाम् ॥
८. श्री जयदेव भणितमिदं अद्भुत केशवकेळि रहस्यम् ।
बृन्दावन विपिने चरितं वितनोतु शुभानि यशस्यम् ॥

**श्लोकः**

विश्वेशां अनुरञ्जनेन जनयन् – आनन्दमिन्दीवर श्रेणी श्यामळ कोमळैः उपनयन् अङ्गैरनङ्गोत्सवम् ।
स्वच्छन्दं व्रजसुन्दरीभिरभितः प्रत्यङ्गमालिङ्गितः श्रुङ्गारः सखि मूर्तिमानिव मधौ मुग्धो हरिः क्रीडति ॥

अद्योत्सङ्गवसद्भुजङ्ग कवळ क्लेशादिवेशाचलं प्रालेय प्लवनेच्छयाऽनुसरति श्रीखण्डशैलानिलः ।
किञ्चित् स्निग्ध रसाल मौळि मुकुळान्यालोक्य हर्षोदयात् उन्मिलन्ति कुहूः कुहूरिति
कलोत्ताळाः पिकनां गिरः ॥

रसोल्लास भरेण विभ्रमभृतां आभिरमामभ्रुवां अभ्यर्णं परिरभ्य निर्भरमुरः प्रेमान्धया राधया ।
सादु त्वद्वदनं सुधामयमिति व्याहृत्य गीतस्तुतिव्यजात् उद्धणचुम्बितः स्मितमनोहारी हरिः पातु वः ॥

इति श्री गीत गोविन्द श्रुङ्गार महाकाव्ये श्रीकृष्णदास जयदेवकृतौ
सामोददामोदरोनाम प्रथमस्सर्गः
*******************

**श्री गीतगोविन्द महाकव्य – द्वितीयस्सर्गः**

विहरति वने राधा साधारण प्रणये हरौ विगळित निजोत्कर्षाद् ईर्ष्यावशेन गताऽन्यतः ।
क्वचिदपि लताकुञ्जे गुञ्जन्मधुव्रतमण्डली मुखर शिखरे लीनादीनाप्युवाच रहस्सखीम् ॥

**पञ्चमाष्टपति – ५**

| राग : तोडि | ताळम् : आदि |
|---|---|

१. सञ्चरदधर सुदा मधुरध्वनि मुखरितमोहन वंशम् ।
चलित दृगञ्चल चञ्चलमौलि कपोलविलोलवसन्तम् ॥
प. रासे हरिमिह विहित विलासं स्मरति मनो मम कृत परिहासम् ।
२. चन्द्रक चारु मयूर शिखण्डक मण्डल वलयित केशम् ।

----------------------------------------------------------------------------------------------------

प्रचुर पुरन्दर धनुरनुरञ्जित मेदुर मुदिर सुवेशम् ॥
३. गोपकदम्ब नितम्बवतीमुख चुम्बन लम्बित लोभम् ।
बन्धुजीव मधुराधरपल्लव कलित दरस्मित शोभम् ॥
४. विपुल पुलकभुज पल्लव वलयित वल्लव युवति सहस्रम् ।
करचरणोरसि मणिगण भूषण किरण विभिन्न तमिस्रम् ॥
५. जलदपटल चलदिन्दु विनिन्दक चन्दन बिन्दु ललाटम् ।
पीनपयोधर परिसरमर्दन निर्दय हृदय कपाटम् ॥
६. मणिमय मकर मनोहर कुण्डल मण्डित गण्डमुदारम् ।
पीतवसनं अनुगत मुनि मनुज सुरासुर वर परिवारम् ॥
७. विशद कदम्ब तले मिळितं कलिकलुषभयं शमयन्तम् ।
मामपि किमपि तरङ्गदनङ्ग दृशा वपुषा रमयन्तम् ॥
८. श्री जयदेव भणितं अति सुन्दर मोहन मधुरिपु रूपम् ।
हरिचरणस्मरणं प्रति सम्प्रति पुण्यवतामनुरूपम् ।

## श्लोकः

गणयति गुणग्रामं भ्रामं भ्रमादपि नेहते वहति च परीतोषं दोषं विमुञ्चति दूरतः ।
युवतिषुवलतृष्णे कृष्णे विहारिणि मां विना पुनरपि मनो वामं कामं करोति करोमि किम् ॥

*******************

## षष्ठाष्टपति – ६

| राग : काम्बोदि | ताळम् : त्रिपुट |
|---|---|

१. निभृत निकुञ्ज गृहं गतय निशिरहसि निलीय वसन्तम् ।
चकित विलोचन सकल दिशा रतिरभस वशेन हसन्तम् ॥
प. सखि हे केशिमथनमुदारम् ।
अ. रमय मया सह मदनमनोरथभावितय सविकारम् ।
२. प्रथमसमागमलज्जितया पटुचाटुशतैरनुकूलम् ।
मृदमधुरस्मितभाषितया शिथिलीकृतजघनदुकूलम् ॥
३. किसलयशयननिवेशितया चिरमुरसि ममैव शयानम् ।
कृतपरिरम्भणचुम्बनया परिरभ्य कृताधरपानम् ॥
४. अलसनिमीलितलोचनया पुलकावलिललितकपोलम् ।
श्रमजलसकलकळेबरया वरमदनमुदादतिलोलम् ॥

---

५. कोकिलकलरवकूजितया जितमनसिजतन्त्रविचारम् ।
श्लथकुसुमाकुलकुन्तलया नखलिखितघनस्तनभारम् ॥
६. चरणरणितमणिनूपुरया परिपूरित सुरतवितानम् ।
मुखरविश्रुङ्खलमेखलया सकचग्रहचुम्बनदानम् ॥
७. रतिसुखसमयरसालसया दरमुकुळितनयनसरोजम् ।
निस्सहनिपतिततनुलतया मधुसूदनमुदितमनोजम् ॥
८. श्री जयदेवभणितमिदमतिशयमधुरिपुनिधुवनशीलम् ।
सुखमुत्कण्ठितरधिकया कथितं वितनोतुसलीलम् ॥

## श्लोकः

हस्तस्रस्तविलासवंशमनृजुभ्रूवल्लिमद्वल्लवी, बृन्दोत्सह दृगन्तवीक्षितमतिस्वेदार्द्रगण्डस्थलम् ।
मामुद्वीक्ष्य विलक्षितस्मितसुधामुग्धाननङ्गानने, गोविन्दं व्रजसुन्दरीगणमृतं पश्यामि हृष्यामि च ॥
दुरालोकस्तेक स्तबक नवकाशोक लतिका विकासः कासारोपवन पवनोऽयं व्यथयति ।
अपि भ्राम्यध्भृङ्गीरणित रमणीया न मुकुळ प्रसूतिश्चूतानां सखि शिखरिणीयं सुखयति ॥
साकूतस्मितमाकुलाकुलगळद्धम्मिल्लमुल्लासित, भ्रूवल्लीकमळिकदर्शितभुजामूलार्धदृष्टस्तनम् ।
गोपीनां निभृतं निरीक्ष्य गमिताकांक्षश्चिरं चिन्तयन्, अन्तर्मुग्धमनोहरं हरतु वः क्लेशं नवः केशवः ।

इति श्रीगीतगोविन्दे श्रुङ्गारमहाकाव्ये श्रीकृष्णदासजयदेवकृतौ
अक्लेशकेशवोनाम द्वितीयस्सर्गः ।
*******************

## श्री गीतगोविन्द महाकव्य – त्रुतीयस्सर्गः

कंसारिरपि संसार वासनाबद्धश्रुङ्खलाम् । राधामादाया हृदये तत्याज वजसुन्दरीः ॥
इतस्ततस्तामनुसृत्य राधिकां अनङ्गबाणव्रणखिन्नमानसः ।
कृतानुतापस्सकळिन्दनन्दिनी तटान्तकुञ्जे विषसाद माधवः ॥

### सप्तमाष्टपति – ७

| राग : भूपाळ | ताळम् : त्रिपुट |
|---|---|

१. मामियं चलिता विलोक्य वृतं वधूनिचयेन सापराधतया मयाऽपि न वारिताऽतिभयेन ।
प. हरिहरि हतादरतया, सा गता कुपितेव ।

------------------------------------------------------------------

२. किं करिष्यति किं वदिष्यति सा चिरं विरहेण । किं धनेन जनेन किं मम जीवितेनगृहेण ॥
३. चिन्तयामि तदाननं कुटिलभ्रु कोपभरेण । शोणपद्ममिवोपरिभ्रमताऽकुलं भ्रमरेण ॥
४. तामहं हृदि सङ्गतां अनिशं भृशं रमयामि । किं वनेऽनुसरामि तामिह किं वृथाविलपामि ॥
५. तन्वि! खिन्न मसूयया हृदयं तवाकलयामि । तन्न वेद्मि कुतोगताऽसि नतेन तेऽनुनयामि ॥
६. दृश्यसे पुरतो गतागतमेव मे विदधासि । किं पुरेव ससम्भ्रमं परिरम्भणं न ददासि ॥
७. क्षंयतामुपरं कदापि तवेदृशं न करोमि । देहि सुन्दरि! दर्शनं मम मन्मथेन दुनोमि ॥
८. वर्णितं जयदेवकेन हरेरिदं प्रवणेन । किन्दुबिल्वसमुद्रसम्भवरोहिणीरमणेन ॥

## श्लोकः

हृदि बिसलताहारो नायं भुजङ्गमनायकः कुवलय दळश्रेणी कण्ठे न सा गरळ द्युतिः ।
मलयजरजो नेदं भस्म प्रियारहिते मयि प्रहर न हरभ्रान्त्याऽनङ्ग! क्रुधा किमु धावसि ॥
पाणौ मा कुरु चूतसायकममुं मा चाप मारोपय क्रीडानिर्जितविश्व! मूर्छतनाघातेन किं पौरुषम् ।
तस्याएव मृगीदृशो मनसिज प्रेङ्खत्कटाक्षाशुग, श्रेणीजर्जरितं मनागपि मनो नाद्यापि सन्धुक्षिते ॥
भ्रूपल्लवं धनुरपाङ्ग तरङ्गितानि बाणाः गुणश्रवणपाळिरिति स्मरेण ।
तस्यामनङ्गजय जङ्गम देवतायां अस्त्रेणि निर्जित जगन्ति किमर्पितानि ॥
भ्रूचापे निहितः कटाक्षविशिखोनिर्मातुमर्मव्यथां, श्यामात्म कुटिलः करोतु कबरीभारोऽपि मारोद्यमम् ।
मोहं तावदयं च तन्वि! तनुतां बिम्बाधरो रागवान्, सद्वृत्तःस्तनमण्डलस्तव कथं प्राणैर्मम क्रीडति ॥
तानि स्वर्शसुखानि ते च सरळाःस्निग्दादृशोविभ्रमाः, तद्वक्त्राम्बुजसौरभं स च सुधास्यन्दी गिरां वक्रिमा ।
सा बिम्बाधरमाधुरीति विषया सङ्गेऽपि चेन्मानसं, तस्यां लग्नसमाधि हन्त! विरहव्याधिः कथं वर्धते ॥
तिर्यक्कण्ठ विलोलमौळि तरळोत्तम्सस्य वंशोच्चरत्, गीतस्थान कृतावधानललनालक्षैर्न संलक्षिताः ।
सम्मुग्धं मधुसूधनस्य मधुरे राधामुखेन्दौ मृदु, स्यन्दं कन्दळिताश्चरं ददतु वःक्षेमं कटाक्षोर्मयः ॥

इति श्रीगीतगोविन्दे श्रुङ्गारमहाकाव्ये श्रीकृष्णदासजयदेवकृतौ
मुग्धमधुसूदनोनाम त्रितीयस्सर्गः

********************

## श्री गीतगोविन्द महाकव्य – चतुर्थिस्सर्गः

यमुनातीर वानीर नीकुञ्जे मन्दमास्थितम् । प्राह प्रेमभरोद्भ्रान्तं माधवं राधिका सखी ।

### अष्टमाष्टपति – ८

| राग : सौराष्ट्र – कानड | ताळम् : आदि |
|---|---|

१. निन्दति चन्दनमिन्दुकिरणमनु विन्दति खेदमधीरम् ।
व्याळ निलय मिळनेन गरळमिव कलयति मलयसमीरम् ।
प. सा विरहे तव दीन ।
अ. माधव मनसिज विशिख भयादिव भावनया त्वयि लीना ॥
२. अविरळ निपतित मदनशरादिव भवदवनाय विशालम् ।
स्वहृदय मर्मणि वर्म करोति सजल नळनीदळ जालम् ॥
३. कुसुमविशिख शरतल्पमनल्प विलासकला कमनीयम् ।
व्रतमिव तव परिरम्भ सुखाय करोति कुसुमशयनीयम् ॥
४. वहति च गळित विलोचन जलधरमानन कमलमुदारम् ।
विधुमिव विकट विधुन्तुद दन्त दळन गळितामृत धारम् ॥
५. विलिखति रहसि कुरङ्गमदेन भवन्तमसमशरभूतम् ।
प्रणमति मकरमधो विनिधाय करे च शरं नवचूतम् ॥
६. प्रतिपदमिदमपि निगदति माधव! तव चरणे पतिताऽहम् ।
त्वयि विमुखे मयि सपदि सुधानिधिरपि तनुते तनुदाहम् ॥
७. ध्यानलयेन पुरः परिकल्प्य भवन्तमतीव दुरापम् ।
विलपति हसति विषीदति रोदिति चञ्चति मुञ्चति तापम् ॥
८. श्रीजयदेव भणितमिदमधिकं यदि मनसा नटनीयम् ।
हरिविरहाकुल वल्लवयुवति सखीवचनं पठनीयम् ॥

## श्लोकः

आवासो विपिनायते प्रियसखीमालाऽपि जालायते, तापो निश्वसितेन दावदहन ज्वाला कलापायते ।
साऽपी त्वद्विरहेण हन्त! हरिणीरूपायते हा! कथं, कन्दर्पोऽपि यमायते विरचयन् शार्दूल विक्रीडितम् ॥

*******************

## नवमाष्टपति – ९

| राग : बिलहरि – देशाक्षि | ताळम् : त्रिपुट |
|---|---|

१. स्तनविनिहितमपि हारमुदारं सा मनुते कृश तनुरतिभारम् ।
प. राधिका कृष्ण । राधिका विरहे तव केशव ।
२. सरसमसृणमपि मलयजपङ्कं पश्यति विषमिव वपुषि सशङ्कम् ।
३. श्वसितपवनं अनुपम परिणाहं मदन दहनमिव वहति सदाहम् ।

----------------------------------------------------------------------

४. दिशि दिशि किरति सजलगण जालं नयन नळिनमिव विगळित नाळम् ।
५. नयन विषयमपि किसलय तल्पं कलयति विहित हुताशन कल्पम् ।
६. त्यजति न पाणि तलेन कपोलं बाल शशिनमिव सायमलोलम् ।
७. हरिरिति हरिरिति जपति सकामं विरह विहित मरणेव निकामम् ।
८. श्री जयदेव भणितमिति गीतं सुखयतु केशव पदमुपनीतम् ।

## श्लोकः

सा रोमाञ्चति सीत्करोति विलपति उत्कम्पते ताम्यति, ध्यायति उद्भ्रमति प्रमीलति पतति
उद्यातिमूर्छत्यपि ! एतावती अतनुज्वरे वरतनुर्जीवेन् न्न किं ते रसात्, स्ववैंद्यप्रतिम! प्रसीदसि!
यदि त्यक्तोऽन्यथा हस्तकः ।
स्मरातुरां दैवत वैद्य हृद्य त्वदङ्ग सङ्गामृत मात्रसाध्याम् ।
विमुक्त बाधां कुरुषे न राधां उपेन्द्र वज्राधिक दारुणोसि ॥
कन्दर्पज्वर संज्वराकुलतनोः आश्चर्यमस्याश्चिरं, चेतश्चन्दन चन्द्रमः कमलिनी चिन्तासु सन्ताम्यति ।
किं तु क्लान्तिवशेनशीतलतरं त्वामेकमेव प्रियं, ध्यायन्ति रहसि स्थिता कथमपि क्षीणा क्षणंप्राणिति ॥
क्षणमपि विरहः पुरा न सेहे नयन निमीलन खिन्नया अनयाते ।
श्वसति कथमसौ रसाल शाखां चिरविरहेण विलोक्य पुष्पिताग्राम् ॥
वृष्टि व्याकुल गोकुलावनवशात् उद्धृत्यगोवर्धनं, बिभ्रत् वल्लव वल्लभाभिरधिकानन्दाच्चिरं चुम्बितः ।
दर्षेणेव तदर्पिताधरतटी सिन्दूरमुद्राङ्कितो, बाहुर्गोपतनोस्तनोतु भवतां श्रेयान्सि कंसद्विषः ॥

इति श्रीगीतगोविन्दे श्रुङ्गारमहाकाव्ये श्रीकृष्णदासजयदेवकृतौ
स्निग्धमधुसूदनोनाम चतुर्थस्सर्गः
*******************

## श्री गीतगोविन्द महाकव्य – पञ्चमस्सर्गः

अहमिह निवसामि याहि राधां अनुनय मद्वचनेन च आनयेथाः ।
इति मधुरिपुणा सखी नियुक्ता स्वयमिदमेत्य पुनर्जगाद राधाम् ॥

### दशमाष्टपति – १०

| राग : आनन्दभैरवि | ताळम् : आदि |
|---|---|

१. वहति मलयसमीरे मदनमुपनिधाय । स्फुटति कुसुमनिकरे विरहि हृदय दळनाय ॥

---

प. तव विरहे वनमाली, सखि सीदति राधे ।
२. दहति शिशिरमयूखे मरणं अनुकरोति । पतति मदनविशिखे विलपति विकलतरोऽति ॥
३. ध्वनति मधुपसमूहे श्रवणमपिदधाति । मनसि चलित विरहे निशिनिशि रुजमुपयाति ॥
४. वसति विपिन विताने त्यजति ललितधाम । लुठति धरणिशयने बहु विलपति तव नाम ॥
५. रणति पिक समवाये प्रतिदिशमनुयाति । हसति मनुजनिचये विरहमपलपतिनेति ॥
६. स्फुरति कलरवरावे स्मरति मणितमेव । तव रतिसुख विभवे गणयति सुगुणमतीव ॥
७. तत्वदभिधशुभदमासं वदति यदि श्रुणोति । तमापि जपति सरसं युवतिषु न रतिमुपैति ॥
८. भणति कवि जयदेवे विरह विलसितेन । मनसि रभसविभवे हरिरुदयतु सुकृतेन ॥

## श्लोकः

पूर्वं यत्र समं त्वया रतिपतेरासादिता सिद्धियः, तस्मिन्येव निकुञ्ज मन्मथ महातीर्थे पुनर्माधवः ।
ध्यायन् त्वामनिशं जपन्नपि तवैवालाप मन्त्रावलीं, भूयस्त्वत्कुचकुम्भनिर्भर परीरम्भामृतं वाञ्छति ॥

## एकादषाष्टपति – ११

| राग : केदारगौळ | ताळम् : आदि |
|---|---|

१. रतिसुखसारे गतमभिसारे मदनमनोहर वेषम् ।
न कुरु नितम्बिनि गमनविलम्बनमनुसर तं हृदयेशम् ॥
प. धीरसमीरे यमुनातीरे वसति वने वनमाली ।
अ. गोपी पीन पयोधर मर्दन चञ्चलकरयुगशाली ।
२. नामसमेतं कृतसङ्केतं वादयते मृदुवेणुम् ।
बहुमनुते तनु ते तनुसङ्गत पवनचलितमपि रेणुम् ॥
३. पतति पतत्रे विचलति पत्रे शङ्कित भवदुपयानम् ।
रचयति शयनं सचकित नयनं पश्यति तव पन्थानम् ॥
४. मुखरमधीरं त्यज मञ्जीरं रिपुमिव केळिषू लोलम् ।
चल सखि कुञ्जं सतिमिरपुञ्जं शीलय नील निचोळम् ॥
५. उरसिमुरारेः उपहितहारे घन इव तरळबलाके ।
तटिदिव पीते रतिविपरीते राजसि सुकृत विपाके ॥
६. विगळित वसनं परिहृतरशनं घटय जघनमपिधानम् ।
किसलय शयने पङ्कजनयने! निधिमिव हर्ष निदानम् ॥
७. हरिरभिमानी रजनिरिदानीं इयमुपयाति विरामम् ।
कुरु मम वचनं सत्वर रचनं पूरय मधुरिपुकामम् ॥
८. श्री जयदेवे कृतहरिसेवे भणति परम रमणीयम् ।

प्रमुदित हृदयं हरिमतिसदयं नमत सुकृत कमनीयम् ॥

**श्लोकः**

विकिरति मुहुः श्वासान् आशाः पुरो मुहुरीक्षते प्रविशति मुहुः कुञ्जं गुञ्जन् मुहुर्बहु ताम्पति ।
रचयति मुहुः शय्यां पर्याकुलं मुहुरीक्षते मदनकदनक्लान्तः कान्ते प्रियस्तव वर्तते ॥
त्वद्वाक्येन समं समग्रमधुना तिग्मांशुरस्तं गतो गोविन्दस्य मनोरथेन च समं प्राप्तं तमः सान्द्रताम् ।
कोकानां करुणस्वनेन सदृशी दीर्घा मदभ्यर्थना तन्मुग्धे विलम्बनमसौ रम्योऽभिसारक्षणः ॥
आश्लेषदनु चुम्बनादनु नखोल्लेखादनु स्वान्तज प्रोद्बधादनु सम्भ्रमादनु रतारम्भादनु प्रीतयोः ।
अन्यार्थं गतयोर्भ्रमान्मिलितयोः सम्भाषणैर्जानतोः दम्पत्योरिह को न को न तमसि व्रीडाविमिश्रोरसः ॥
सभयचकितं विन्यस्यन्तीं दृश तिमिरे पथि प्रतितरु मुहुः स्थित्वा मन्दं पदानि वितन्वतीम् ।
कथमपि रहः प्राप्तामङ्गैरनङ्गरतङ्गितैः सुमुखि सुभगः पश्यन् स त्वामुपैतु कृतार्थताम् ॥
राधामुग्धमुखारविन्दमधुपः त्रैलोक्यमौलिस्थलीनेपथ्योचितनीलरत्नमवनीभरावतारान्तकः ।
स्वच्छन्दं व्रजसुन्दरीजनमनस्तोषप्रदोषश्चिरं कंसध्वंसनधूमकेतुरवतु त्वां देवकीनन्दनः ॥

इति श्रीगीतगोविन्दे श्रृङ्गारमहाकाव्ये श्रीकृष्णदासजयदेवकृतौ
अभिसारिकावर्णने साकांक्ष पुण्डरीकाक्षोनाम पञ्चमस्सर्गः
*******************

## श्री गीतगोविन्द महाकव्य – षष्ठस्सर्गः

अथ तां गन्तुमशक्ता चिरमनुरक्तां लतागृहे दृष्ट्वा । तच्चरितं गोविन्दे मनसिजमन्दे सखी प्राह ॥

### द्वादषाष्टपति – १२

| राग : शङ्कराभरण | ताळम् : त्रिपुट |
|---|---|

१. पश्यति दिशि दिशि रहसि भवन्तं त्वदधरमधुरमधूनि पिबन्तम् ।
प. नाथहरे जगन्नाथ हरे! सीदती राधाऽवासगृहे ।
२. त्वदभिसरण रभसेन वलन्ती । पतति पदानि कियन्ति चलन्ती ॥
३. विहित विशद बिसकिसलय वलया । जीवति परमिह तव रतिकलया ॥
४. मुहुरवलोकित मण्डनलीला । मधुरिपुरहमिति भावनशीला ॥
५. त्वरितमुपैति न कथमभिसारम् । हरिरिति वदति सखीमनुवारम् ॥
६. श्लिष्यति चुम्बति जलधरकल्पम् । हरिरुपगत इति तिमिरमनल्पम् ॥
७. भवति विलम्बिनि विगलितलज्जा । विलपति रोदिति वासकसज्जा ॥
८. श्रीजयदेवकवेरिदमुदितम् । रसिकजनं तनुतामतिमुदितम् ॥

------------------------------------------------------------------------

## श्लोकः

विपुलपुलकपाळिः स्फीतसीत्कारमन्तः जनित जडिम काकु व्याकुलं व्याहरन्ती ।
तव कितव विधत्तेऽमन्द कन्दर्प चिन्तां रसजलधिनिमग्ना ध्यानलग्ना मृगाक्षी ॥
अङ्गेष्वाभरणं करोति बहुशः पत्रेऽपि सञ्चारिणि, प्राप्तं त्वां परिशङ्कते वितनुते शय्यां चिर ध्यायति ।
इत्याकल्प विकल्पतल्परचना सङ्कल्प लीलाशत, व्यासक्तापि विना त्वया वरतनुर्नैषा निशां नेष्यति ॥
किं विश्रांयसि कृष्ण भोगिभवने भाण्डीरभूमीरुहि भ्रातर्याहि न दृष्टिगोचरमितः सानन्दनन्दास्पदम् ।
राधाया वचनं तदध्वगमुखात् नन्दान्तिके गोपतो गोविन्दस्य जयन्ति सायमतिथि प्राशस्त्यगर्भा गिरः ॥

इति श्रीगीतगोविन्दे श्रुङ्गारमहाकाव्ये श्रीकृष्णदासजयदेवकृतौ
सोत्कण्ठवैकुण्ठोनाम षष्ठस्सर्गः

********************

## श्री गीतगोविन्द महाकव्य – सप्तमस्सर्गः

अत्रान्तरे च कुलटाकुल वर्त्मघात सञ्जात पातक इव स्फुटलाञ्छन श्रीः ।
बृन्दावनान्तरं अदीपयत् अंशुजालैः दिक्सुन्दरी वदन चन्दन बिन्दुरिन्दुः ॥
प्रसरति शशधरबिम्बे विहितविलम्बे च माधवे विधुरा । विरचितविविधविलापं सा परितापं चकारोच्चैः ॥

### त्रयोदषाष्टपति – १३

| राग : अहिरि नीलाम्बरि | ताळम् : झम्पे |
|---|---|

१. कथितसमयेऽपि हरि रहह न ययौ वनं मम विफलमिद ममल रूपमपि यौवनम् ।
प. यामिहे कमिह शरणम् ।
अ. सखीजन वचन वञ्चिताहम् ।
२. यदनु गमनाय निशि गहनमपि शीलितं तेन मम हृदयमिदं असमशर कीलितम् ।
३. मम मरणमेव वरं अतवितथि केतना किमिति विषहामि विरहानलं अचेतना ।
४. अहह! कलयामि वलयादि मणिभूषणं हरविरहदहनवहनेन बहुदूषणम् ।
५. मामिह हि! विधुरयति मधुरमधुयामिनि काऽपि हरिमनुभवति कृत सुकृत कामिनी ।
६. कुसुम सुकुमारतनुं असमशरलीलया स्रगपि हृदि हन्ति मां अतिविषम शीलया ।
७. अहमिह हि निवसामि न विगणित वेतसा स्मरति मधुसूदनो मामपि न चेतसा ।
८. हरिचरण शरण जयदेव कवि भारती वसतु हृदि युवतिरिव कोमळ कलावती ।

## श्लोकः

-----------------------------------------------------------------------

तक्किं कामपि कामिनीं अभिसृतः किं वा कलाकेळिभिः, बद्धो बन्धुभिरन्धकारिणि वनाभ्यर्णे किमुद्भ्रमति ।
कान्तः क्लान्तमना मनागपि पथि प्रस्थातुमेवाक्षमः, सङ्केती कृत मञ्जु वञ्जुळ लताकुञ्जेऽपि यन्नागतः ॥

*******************

अथागतां माधवमन्तरेण सखीमियं वीक्ष्य विषादमूकाम् ।
विशङ्कमाना रमितं कयाऽपि जनार्दनं दृष्टवत् एतदाह ॥

### चतुर्दषाष्टपति – १४

| राग : सारङ्ग | ताळम् : त्रिपुट |
|---|---|

१. स्मर समरोचित विरचित वेषा । गळित कुसुमभर विलुळित केशा ॥
प. काऽपि मधुरिपुणा विलसति । युवतिरत्यधिकगुणा ॥
२. हरिपरिरम्भण वलित विकारा । कुचकलशोपरि तरलित हारा ॥
३. विचलदलक ललितानन चन्द्रा । तदधरपान रभस कृततन्द्रा ॥
४. चञ्चल कुण्डल ललित कपोला । मुखरित रशन जघन गतिलोला ॥
५. दयित विलोकित लज्जित हसिता । बहुविध कूजित रतिरस रसिता ॥
६. विपुल पुलक पृथु वेपथु भङ्गा । श्वसित निमीलित विकसदनङ्गा ॥
७. श्रमजल कणभर सुभग शरीरा । परिपतितोरसि रतिरणधीरा ॥
८. श्रीजयदेव भणित हरिरमितम् । कलिकलुषं जनयतु परिशमितम् ॥

**श्लोकः**

विरह पाण्डु मुरारि मुखाम्बुज द्युतिरयं तिरयन्नपि वेदनाम् ।
विधुरतीव तनोति मनोभुवः सुहृदये हृदये मदनव्यथाम् ॥

*******************

### पञ्चदषाष्टपति – १५

| राग : सावेरि | ताळम् : छापु |
|---|---|

१. समुदित वदने रमणीवदने चुम्बन चलिताधरे ।
मृगमद तिलकं लिखति सपुलकं मृगमिव रजनीकरे ।
प. रमते यमनापुळिनवने, विजयी मुरारिरधुना ॥
२. घनचय रुचिरे रचयति चिकुरे तरळित तरुणानने ।
कुरवक कुसुमं चपलासुषमं रतिपति मृगकानने ॥

३. घटयति सुघने कुचयुगगगने मृगमद रुचिरूपिते ।
मणिसरममलं तारकपटलं नखपदशशिभूषिते ॥
४. जितबिसशकले मृदुभुजयुगळे करतल नळिनीदळे ।
मरकतवलयं मधुकरनिचयं वितरति हिमशीतळे ॥
५. रतिगृहजघने विपुलापघने मनसिज करकासने ।
मणिमयरसनं तोरणहसनं विकिरति कृतवासने ॥
६. चरणकिसलये कमलानिलये नखमणि गणपूजिते ।
बहिरपवरणं यावकभरणं जनयति हृदियोजिते ॥
७. ध्यायति सदृशं कामपि सुदृशं खलहलधर सोदरे ।
किमफलमवसं चिरमिहविरसं वद सखि विटपोदरे ॥
८. इहरसभणने कृतहरिगुणने मधुरिपु पदसेवके ।
कलियुगचरितं न वसतु दुरितं कविनृपजयदेवके ॥

## श्लोकः

नायातस्सखि निर्दयो यदि शठस्त्वं दूति किं दूयसे, स्वच्छन्दं बहुवल्लभस्सरमते किं तत्र ते दूषणम् ।
पश्याद्य प्रियसङ्गमाय दयितस्य आकृष्यमाणं गुणैः, उत्कण्ठार्तिभरादिव स्फटदिदं चेतस्वयं यास्यति ॥

********************

## षोडशाष्टपति – १६

| राग : पुन्नगवराळि | ताळम् : आदि |
|---|---|

१. अनिलतरळ कुवलय नयनेन । तपति न सा किसलय शयनेन ॥
प. या रमिता वनमालिना सखि ।
अ. या रमिता वनमालिना ।
२. विकसित सरसिज ललित मुखेन । स्फुटति न सा मनसिज विशिखेन ॥
३. अमृत मधुर मृदुतर वचनेन । ज्वलति न सा मलयज पवनेन ॥
४. स्थल जलरुह रुचि कर चरणेन । लुठति न सा हिमकर किरणेन ॥
५. सजल जलद समुदय रुचिरेण । दलति न सा हृदि विरह भरेण ॥
६. कनक निचय रुचि शुचि वसनेन । श्वसिति न सा परिजन हसनेन ॥
७. सकल भुवन जन वरतरुणेन । वहति न सा रुजं अति करुणेन ॥
८. श्रीजयदेव भणति वचनेन । प्रविशतु हरिरपि हृदयं अनेन ॥

## श्लोकः

----------------------------------------------------------------------

मनो भवानन्दन चन्दनानिल प्रसीद रे दक्षिण मुञ्च वामताम् ।
क्षणं जगत्प्राण निधाय माधवं पुरो मम प्राणहरो भविष्यसि ॥
रिपुरिव सखी संवासोऽयं शिखीव हिमानिलो विषमिव सुधारश्मिर्यस्मिन् दुनोति मनोगते ।
हृदयमदये तस्मिन्नेवं पुनर्वलते बलात् कुवलयदृशां वामः कामो निकाम निरङ्कुशः ॥
बाधां विधेहि मलयानिल पञ्चबाण प्राणान् गृहण न गृहं पुनराश्रयिष्ये ।
किं ते कृतान्तभगिनि क्षमया तरङ्गैः, अङ्गानि सिञ्च मम शाम्यतु देहदाहः ॥
सान्द्रानन्द पुरन्दरादि दिविषद्बृन्दैरमन्दादरात् आनम्रैर् मकुटेन्द्रनीलमणिभिः सन्दर्शितेन्दीवरम् ।
स्वच्छन्दं मकरन्दसुन्दरगलन् मन्दाकिनीमेदुरं, श्रीगोविन्दपदारविन्दं अशुभस्कन्दाय वन्दामहे ॥

इति श्रीगीतगोविन्दे श्रुङ्गारमहाकाव्ये श्रीकृष्णदासजयदेवकृतौ
विप्रलब्धावर्णने नागरिक नारायणोनाम सप्तमस्सर्गः

*******************

## श्री गीतगोविन्द महाकव्य – अष्टमस्सर्गः

अथ कथमपि यामिनीं विनीय स्मरशरजर्जरिताऽपि सा प्रभाते ।
अनुनयवचनं वदन्तमग्रे प्रणतमपि प्रियमाह साभ्यसूयम् ॥

### सप्तदशाष्टपति – १७

| | |
|---|---|
| राग : आरभि | ताळम् : आदि |

१. रजनि जनितगुरु जागर राग कषायितमलसनिमेषम् ।
वहति नयनमनुरागमिव स्फुटमुदितरसामिनिवेशम् ।
प. याहि माधव याहि केशव मा वद कैतववादम् ।
अ. तामनुसर सरसीरुहलोचन या तव हरति विषादम् ॥
२. कज्जलमलिनविलोचन चुम्बनविरचितनीलिमरूपम् ।
दशनवसनमरुणं तव कृष्ण तनोति तनोरनुरूपम् ॥
३. वपुरनुसरति तव स्मरसङ्गर खरनखरक्षतरेखम् ।
मरकत शकल कलित कलधौतलिपेरिव रतिजयलेखम् ॥
४. चरणकमलगळत् अलक्तकसिक्तमिदं तव हृदयमुदारम् ।
दर्शयतीव बहिर्मदनद्रुम नव किसलय परिवारम् ॥
५. दशनपदम् भवदधरगतं मम जनयति चेतसि खेदम् ।
कथयति कथमधुनाऽपि मया सह तव वपुरेतदभेदम् ॥

-----------------------------------------------------------------

६. बहिरिव मलिनतरं तव कृष्ण मनोऽपि भविष्यति नूनम् ।
कथमथ वञ्चयसे जनमनुगतं असमशरज्वरदूनम् ॥
७. भ्रमति भवानबलाकबलाय वनेषु किमत्र विचित्रम् ।
प्रथयति पूतनिकैव वधूवद निर्दय बालचरित्रम् ॥
८. श्रीजयदेव भणित रति वञ्चित खण्डित युवति विलापम् ।
श्रुणुत सुधामधुरं विबुधा वदतापि सुखं सुदुरापम् ॥

## श्लोकः

तवेदं पश्यन्त्याः प्रसरदनुरागं बहिरिव प्रियापादालक्तच्छुरितमरुणच्छायहृदयम् ।
ममाद्य प्रख्यातप्रणयभरभङ्गेन कितव त्वदालोकः शोकादपि किमपि लज्जां जनयति ॥
प्रातर्नीलनिचोलमच्युतमुरःसंवीतपीतांशुकं राधायाश्चकितं विलोक्य हसति स्वैरं सखीमण्डले ।
व्रीडाचञ्चलमञ्चलं नयनयोराधाय राधानने स्मेरस्मेरसुखोऽयमस्तु जगदानन्दाय नन्दात्मजः ॥

इति श्रीगीतगोविन्दे श्रुङ्गारमहाकाव्ये श्रीकृष्णदासजयदेवकृतौ
खण्डितावर्णने विलक्ष लक्ष्मीपतिर्नाम अष्टमस्सर्गः

*******************

## श्री गीतगोविन्द महाकव्य – अष्टमस्सर्गः

तमथ मन्मथखिन्नां रतिरसभिन्नां विषाद सम्पन्नाम् ।
अनुचिन्तित हरिचरितां कलहान्तरितां उवाच रहसि सखी ॥

### अष्टादशाष्टपति – १८

| राग : यदुकुलकाम्बोधि | ताळम् : आदि |
|---|---|

१. हरिरभिसरति वहति मधुपवने । किमपरमधिक सुखं सखि भवने ॥
प. माधवे ।
अ. मा कुरु मानिनि मानं अये सखि ।
२. ताळफलादपि गुरुमतिसरसम् । किमु विफली कुरुषे कुचकलशम् ॥
३. कति न कथितमिदं अनुपदमचिरम् । मा परिहर हरिं अतिशयरुचिरम् ॥
४. किमिति विषीदसि रोदिषि विकला । विहसति युवति सभा तव सकला ॥
५. मृदु नळिनीदळ शीतलशयने । हरिमवलोकय सफलय नयने ॥
६. जनयसि मनसि किमिति गुरु खेदम् । श्रुणु मम सुवचनं अनीहित भेदम् ॥

---

७. हरिरुपयातु वदतु बहुमधुरम् । किमिति करोषि हृदयमति विधुरम् ॥
८. श्रीजयदेव भणितमतिललितम् । सुखयतु रसिक जनं हरिचरितम् ॥

**श्लोकः**

स्निग्धे यत् परिषाऽसि यत्प्रणमति स्तब्धाऽसि यद्रागिणि, द्वेषां यासि यदुन्मुखे विमुखतां याताऽसि तस्मिन् प्रिये । तद्युक्तं विपरीतकारिणि तव श्रीखण्ड चर्चा विषं, शीतांशुस्तपनो हिमं हुतवहः क्रीडामुदो यातनाः ॥ अन्तर्मोहन मौळि घूर्णनमिलन्मन्दार विस्रंसन स्तब्धाकर्षण दृष्टि हर्षणमहामन्त्रः कुरङ्गी दृशाम् । दृप्यद्दानव दूयमान दिविषद्दुर्वार दुःखापदां, भ्रंशः कंसरिपोः समर्पयतु वः श्रेयांसि वंशीरवः ॥

इति श्रीगीतगोविन्दे श्रुङ्गारमहाकाव्ये श्रीकृष्णदासजयदेवकृतौ
कलहान्तरितावर्णने मुग्धमुकुन्दो नाम नवमस्सर्गः
*******************

## श्री गीतगोविन्द महाकव्य – दशमस्सर्गः

अत्रान्तरे मसृणरोषवशादसीम निःश्वास निःसहमुखीं सुमुखीमुपेत्य ।
सव्रीडमीक्षित सखीवदनां दिनान्ते सानन्द गद्गदपदं हरिरित्युवाच ॥

### एकोनविंशाष्टपति – १९

| राग : मुखारि | ताळम् : झम्पे |
|---|---|

१. वदसि यदि किञ्चिदपि दन्तरुचिकौमुदी हरतु दर तिमिरमतिघोरम् ।
स्फुरदधर शीधवे तव वदनचन्द्रमा रोचयतु लोचनचकोरम् ॥
प. प्रिये चारुशीले प्रिये चारुशीले मुञ्च मयि मानमनिदानम् ।
सपदि मदनानलो दहति मम मानसं देहि मुखकमलमधुपानम् ॥
२. सत्यमेवासि यदि सुदति मयि कोपिनी देहि खरनखरशरघातम् ।
घटय भुजबन्धनं जनय रदखण्डनं येन वा भवति सुखजातम् ॥
३. त्वमसि मम जीवनं त्वमसि मम भूषणं त्वमसि मम भवजलधिरत्नम् ।
भवतु भवतीह मयि सततमनुरोधिनी तत्र मम हृदयमतियत्नम् ॥
४. नील नळिनाभमपि तन्वि तव लोचनं धारयति कोकनदरूपम् ।
कुसुमशरबाण भावेन यदि रञ्जयसि कृष्णमिदमेतदनरूपम् ॥
५. स्फुरतु कुचकुम्भयोरुपरि मणि मञ्जरी रञ्जयतु तव हृदयदेशम् ।
रसतु रशनाऽपि तव घनजघनमण्डले घोषयतु मन्मथ निदेशम् ॥

---

६. स्थल कमल भञ्जनं मम हृदय रञ्जनं जनित रति रङ्ग परभागम् ।
भण मसृणवाणि करवाणि चरणद्वयं सरस सदलक्त कसरागम् ॥
७. स्मर गरळ खण्डनं मम शिरसि मण्डनं देहि पदपल्लवमुदारम् ।
ज्वलति मयि दारुणो मदनकदनानलो हरतु तदुपाहित विकारम् ॥
८. इति चटुल चाटुपटु चारु मुर वैरिणो राधिकामधिवचन जातम् ।
जयतु पद्मावतीरमण जयदेवकविभारती भणितमिति गीतम् ॥

**श्लोक:**

परिहर कृतातङ्के शङ्का त्वया सततं घनस्तन जघनयाऽऽक्रान्ते स्वान्ते परानवकाशिनि ।
विशति वितनोरन्यो धन्यो न कोऽपि ममान्तरं स्तनभर परीरम्भारम्भे विधेहि विधेयताम् ॥
मुग्धे विधेहि मयि निर्दयदन्तदंशं दोर्वल्लि बन्ध निबिडस्तन पीडनानि ।
चण्डि त्वमेव मुदमञ्चय पञ्चबाणचण्डाल काण्ड दळनादसवः प्रयान्तु ॥
शशिमुखि तव भाति भङ्गुरभ्रूः, युवजनमोह कराळ काळसर्पी तदुदित भयभञ्जनाय यूनां त्वदधरशीधु सुधैव सिद्ध मन्त्रः ॥ बन्धुकद्युति बान्धवोऽयमधरः स्निग्धो मधूकच्छविः गण्डश्चण्डि चकास्ति नीलनलिन श्रीमोचनं लोचनम् । नासाऽभ्येति तिलप्रसूनपदवीं कुन्दाभदन्ति प्रिये प्रायस्त्वन्मुखसेवया विजयते विश्वं स पुष्पायुधः ॥ व्यथयति वृथा मौनं तन्वि प्रपञ्चय पञ्चमं तरुणि मधुरालापैस्तापं विनोदय दृष्टिभिः । सुमुखि विमुखीभावं तावद्विमुञ्च न मुञ्च मां स्वयमतिशयस्तिग्धो मुग्धे प्रियोऽयमुपस्थितः ॥ दृशो तव मदालसे वदनमिन्दुमत्युन्नतं गतिर्जनमनोरमा विजितरम्भमूरुद्वयम् । रतिस्तव कलावती रुचिरचित्रलेखे भ्रुवौ अहो विविध यौवतं वहसि तन्वि पृथ्वीं गता ॥ प्रीति वस्तनुतां हरिः कुवलयापीडेन सार्धं रणे राधापीनपयोधर, स्मरणकृत्कुम्भेन सम्भेदवान् । यत्र स्विद्यति मीलति क्षणमथक्षिप्ते द्विपे तक्षणात्, कंसस्यालमपूजितं जितमिति व्यामोह कोलाहलः ॥

इति श्रीगीतगोविन्दे श्रृङ्गारमहाकाव्ये श्रीकृष्णदासजयदेवकृतौ
राधावर्णने मुग्धवोनाम दशमस्सर्गः

*******************

**श्री गीतगोविन्द महाकव्य – एकादशस्सर्गः**

सुचिरमनुनयेन प्रीणयित्वा मृगाक्षी गतवति कृतवेषे केशवे कुञ्ज शय्याम् ।
रचित रुचिर भूषां दृष्टिमोषे प्रदोषे स्फुरति निरवसादां काऽपि राधां जगाद ॥

**विंशाष्टपति – २०**

| राग : कल्याणी | ताळम् : छापु |
|---|---|

---

१. विरचितचाटुवचनरचनं चरणे रचितप्रणिपातम् ।
सम्प्रति मञ्जुल वञ्जुल सीमनि केलिशयनमुपयातम् ॥
प. मुग्धे मधुमथनम् ।
अ. अनुगत अनुसर राधे राधे ।
२. घनजघन स्तन भारभरेदर मन्थर चरण विहारम् ।
मुखरितमणि मञ्जीरमुपैहि विधेहि मराळ विकारम् ॥
३. श्रुणु रमणीयतरं तरुणीजन मोहन मधुप विरावम् ।
कुसुमशरासन शासनवन्दिनि पिकनिकरे भज भावम् ॥
४. अनिलतरळ किसलय निकरेण करेण लतानिकुरुम्बम् ।
प्रेरणमिव करभोरु करोति गतिं प्रति मुञ्च विळम्बम् ॥
५. स्फुरितमनङ्ग तरङ्गवशादिव सूचित हरि परिरम्भम् ।
पृच्छमनोहर हारविमल जलधारममुं कुचकुम्भम् ॥
६. अधिगतमखिल सखीभिरिदं तव वपुरपि रतिरण सज्जम् ।
चण्डि रसित रशनारवडिण्डिमं अभिसर सरसमलज्जम् ॥
७. स्मरशर सुभग नखेन सखिं अवलम्ब्य करेण सलीलम् ।
चल वलय क्वणितैरवबोधय हरिमपि निजगति शीलम् ॥
८. श्रीजयदेव भणितं अधिरीकृत हारमुदासित वामम् ।
हरिविनिहित मनसां अधितिष्ठतु कण्ठतटीं अविरामम् ॥

## श्लोकः

सा मां द्रक्ष्यति वक्ष्यति स्मरकथाः प्रत्यङ्गमालिङ्गनैः, प्रीतिं यास्यति रंस्यते सखि समागत्येति चिन्ताकुलः । स त्वां पश्यति वेपते पुळकयति आनन्दति स्विद्यति, प्रत्युद्गच्छति मूर्च्छति स्थिरतमःपुञ्जे निकुञ्जे प्रियः ॥ अक्ष्णोर्निक्षिपदञ्जनं श्रवणयोस्तापिञ्छगुच्छावलीं, मूर्ध्नि श्याम सरोजदाम कुचयोः कस्तूरिका पत्रकम् । धूर्तानां अभिसार साहसकृतां विष्वनिकुञ्जे सखि, ध्वान्तं नीलनिचोळ चारु सुदृशां प्रत्यङ्गमालिङ्गति ॥ काश्मीर गौरवपुषां अभिसारिकाणां आबद्ध रेखमभितो रुचि मञ्जरीभिः । एतत् तमालदळ नीलतमं तमिस्रं तत्प्रेम हेमनिकषोपलतां तनोति ॥

*******************

हारावली तरळ काञ्चन काञ्चिदाम मञ्जीर कङ्कण मणिद्युति दीपितस्य ।
द्वारे निकुञ्ज निलयस्य हरिं निरीक्ष्य व्रीडावतीं अथ सखी निजगाद राधाम् ॥

## एकविंशाष्टपति – २१

---

| राग : घण्टा | ताळम् : झम्पे |
|---|---|

१. मञ्जुतर कुञ्जतल केळिसदने । इह विलस रतिरभस हसित वदने ॥
प. प्रविश राधे माधव समीपम् ।
अ. कुरु मुरारे मङ्गळ शतानि ।
२. नवभवदशोकदळ शयनसारे । इह विलस कुचकलश तरळ हारे ॥
३. चलमलय वन पवन सुरभिशीते । इह विलस रसवलित ललितगीते ॥
४. कुसुमचय रचितशुचि वास गेहे । इह विलस कुसुम सुकुमार देहे ॥
५. मधुतरळ पिकनिकर निनद मुखरे । इह विलस दशनरुचि रुचिर शिखरे ॥
६. वितत बहु वल्लि नव पल्लव घने । इह विलस पीनकुच कुम्भ जघने ॥
७. मधुमुदित मधुपकुल कलितरावे । इह विलस मदनशर रभस भावे ॥
८. विहित पद्मावती सुखसमाजे । भणति जयदेवकवि राजराजे ॥

**श्लोकः**

त्वां चित्तेन चिरं वहन्नयमतिश्रान्तो भृशं तापितः कन्दर्पेण च पातुमिच्छति सुधासम्बाध बिम्बाधरम् ।
अस्याङ्कं तदलङ्कुरु क्षणमिह भ्रूक्षेप लक्ष्मीलव क्रीते दास इवोपसेवित पदाम्भोजे कुतः सम्भ्रमः ॥

*******************

सा ससाध्वससानन्दं गोविन्दे लोललोचना । शिञ्जान मञ्जु मञ्जीरं प्रविवेश निवेशनम् ॥

**द्वाविंशाष्टपति – २२**

| राग : मध्यमावति | ताळम् : आदि |
|---|---|

१. राधावदन विलोकन विकसित विविध विकार विभङ्गम् ।
जलनिधिमिव विधुमण्डलदर्शन तरळित तुङ्ग तरङ्गम् ॥
प. हरिमेकरसं चिरमभिलषत विलासम् ।
अ. सा ददर्श गुरु हर्षवशंवद वदनमनङ्ग विकासम् ।
२. हारममलतर तारमुरसि दधतं परिलभ्य विदूरम् ।
स्फुटतर फेन कदम्बकरम्बितं इव यमुनाजल पूरम् ॥
३. श्यामळ मृदुळ कळेबर मण्डलं अधिगत गौर दुकूलम् ।
नीलनळिनमिव पीतपराग पटलभर वलयित मूलम् ॥
४. तरळ दृगञ्चल चलनमनोहर वदन जनित रतिरागम् ।
स्फुट कमलोदर खेलित खञ्जन युगमिव शरदि तडाकम् ॥

५. वदन कमल परिशीलन मिळितमिहिर सम कुण्डल शोभम् ।
स्मितरुचि रुचिर समुल्लसिताधर पल्लव कृत रतिलोभम् ॥
६. शशिकिरणच्छुरितोदर जलधर सुन्दर कुसुम सुकेशम् ।
तिमिरोदित विधुमण्डल निर्मल मलयज तिलक निवेशम् ॥
७. विपुल पुळकभर दन्तुरितं रति केळि कलाभिरधीरम् ।
मणिगण किरण समूह समुज्ज्वल भूषण सुभग शरीरम् ॥
८. श्री जयदेव भणित विभवद्विगुणीकृत भूषणभारम् ।
प्रणमत हृदि विनिधाय हरिं रुचिरं सुकृतोदयसारम् ॥

**श्लोकः**

अतिक्रम्यापाङ्गं श्रवणपथ पर्यन्त गमनप्रयासेनेवाक्ष्णो तरळतरभावं गमितयोः ।
इदानीं राधायाः प्रियतम समालोक समये पपात स्वेदाम्बु प्रसार इव हर्षाश्रु निकरः ॥
भजन्त्याः तल्पान्तं कृत कपट कण्डूति पिहित स्मिते याते गेहाद्बहिरपि हिताळी परिजने ।
प्रियास्यं पश्यन्त्याः स्मरशर समाकूत सुभगं सलज्जा लज्जापि व्यगमदिव दूरं मृगदिशः ॥
जय श्री विन्यस्तैर्महित इव मन्दार कुसुमैः स्वयं सिन्दूरेण द्विपरणमुदा मुद्रित इव ।
भुजा पीड क्रीडाहत कुवलयापीड करिणः प्रकीर्णा सृग्बिन्दुर्जयति भुजदण्डो मुरजितः ॥

इति श्रीगीतगोविन्दे श्रुङ्गारमहाकाव्ये श्रीकृष्णदासजयदेवकृतौ
सानन्दगोविन्दोनाम एकादशमस्सर्गः
*******************

**श्री गीतगोविन्द महाकव्य – द्वादशस्सर्गः**

गतपति सखीबृन्दे मन्दत्रपाभर निर्भर स्मर परवशाकूत स्फेत स्मित स्नपिताधराम् ।
सरसमलसं दृष्ट्वा हृष्टां मुहुर्नवपल्ल्व प्रसव शयने निक्षिप्ताक्षिमुवाच हरिः प्रयाम् ॥

**त्रयोविंशाष्टपति – २३**

| राग : नादनामक्रिया | ताळम् : आदि |
|---|---|

१. किसलय शयनतले कुरु कामिनि चरण नळिन विनिवेशम् ।
तव पदपल्लव वैरिपराभवं इदमनुभवतु सुवेशम् ॥
प. क्षणमधुना नारायणम् ।
अ. अनुगतं अनुभज राधे ।

---

२. करमकमलेन करोमि चरणमहं आगमितासि विदूरम् ।
क्षणमुपकुरु शयनोपरि मामिव नूपुरमनुगति शूरम् ॥
३. वदन सुधानिधि गळितममृतमिव रचय वचनमनुकूलम् ।
विरहमिवापनयामि पयोधर रोधकमुरसि दुकूलम् ॥
४. प्रिय परिरम्भण रभस वलितमिव पुळकितमतिदुरवापम् ।
मदुरसि कुचकलशं विनिवेशय शोषय मनसिज तापम् ॥
५. अधर सुधारसमुपनय भामिनि जीवय मृतमिव दासम् ।
त्वयि विनिहित मनसं विरहानल दग्धवपुषमविलासम् ॥
६. शशिमुखि मुखरय मणिरशनागुणं अनुगुण कण्ठनिनादम् ।
श्रुतियुगळे पिकरुतविकले मम शमय चिरादवसादम् ॥
७. मामपि विफलरुषा विकलीकृतं अवलोकितुमधुनेदम् ।
मीलति लज्जितमिवनयनं तव विरम विसृज रतिखेदम् ॥
८. श्रीजयदेव भणितमिदमनुपद निगदितमधुरिपु मोदम् ।
जनयतु रसिकजनेषु मनोरम रतिसभाव विनोदम् ॥

**श्लोकः**

प्रत्यूहः पुलकाङ्कुरेण निबिडाश्लेषे निमेषेण च, क्रीडाकूतविलोकने अधरसुधापाने कथानर्मभिः ।
आनन्दाधिगमेन मन्मथकलायुद्धेऽपि यस्मिन्नभूत्, उद्भूतः स तर्योबभूव सुरतारम्भः प्रियम्भावुकः ॥
दोर्भ्यां संयमितः पयोधर भरेणापीडितः पाणिजैः आविद्धो दशनैः क्षताधरपुटः श्रोणीतटेनाहतः ।
हस्तेनानमितः कचे अधरसुधास्वादेन सम्मोहितः कान्तः कामपि तृप्तिमाप तदहो कामस्य वामागतिः ॥
माराङ्के रतिकेळिसंकुल रणारम्भे तया सहसाप्रायं कान्तजयाय किञ्चिदुपरि प्रारम्भि यत्सम्भ्रमात् ।
निष्पन्दा जघनस्थली शिथिलिता दोर्वल्लिरुत्कम्पितं, वक्षो मीलितमक्षि पौरुषरसः स्त्रीणां कुतः सिध्यति ॥
व्यालोलः केशपाशस्तरलितमलकैः स्वेदलोलौ कपोलौ, दष्टा बिम्बाधरश्रीः कुचकलशरुचा हारिता हारयष्टिः । काञ्ची काञ्चिद् गताऽऽशां स्तनजघनपदं पाणिनाऽऽछाद्य सद्यः पश्यन्ती सत्रपं मां तदपि विलुळितस्रग्धरेयं धिनोति ॥ ईषन्मीलित दृष्टि मुग्धहसितं सीत्कारधारावशात् अव्यक्ताकुल केळिकाविलसत् दन्तांशुधौताधारम् । श्वासोत्तप्त पयोधरोपरि परिष्वङ्गी कुरङ्गी दृशो हर्षोत्कर्ष विमुक्ति निःसहतनोर्धन्यो धयत्याननम् ॥ तस्याः पाटलपाणिजाङ्कितमुरो निद्रा कषाये दृशौ, निर्धौतोऽधरशोणिमा मिलुळिता स्रस्तःस्रजो मूर्धजाः ।
काञ्चीदाम दरश्लथाञ्चलमिति प्रातर्निखातैर्दृशोः एभिः कामशरैस्तदद्भुत पत्युर्मनः कीलितम् ॥

अथ कान्तं रतिश्रान्तमभिमण्डन वाच्छया । जगाद माधवं राधा मुग्धा स्वाधीन भर्तृका ॥

*******************

---

## चतुर्विंशाष्टपति – २४

| राग : मङ्गलकैशिक | ताळम् : छापु |
|---|---|

१. कुरुयदु नन्दन चन्दन शिशिरतरेण करेण पयोधरे ।
मृगमद पत्रकमत्र मनोभव मङ्गळ कलश सहोदरे ।
प. निजगाद सा यदुनन्दने ।
अ. क्रीडति हृदयानन्दने ।
२. अळिकुलभञ्जनमञ्जनकं रतिनायकसायकमोचने ।
त्वदधर चुम्बन लम्बितकज्जलं उज्वलय प्रिय लोचने ॥
३. नयनकुरङ्ग तरङ्ग विकास निरासकरे श्रुतिमण्डले ।
मनसिज पाश विलासधरे सुभगे विनिवेशय कुण्डले ॥
४. भ्रमरचयं रचयन्तमुपरि रुचिरंसुचिरम्ममसम्मुखे ।
जितकमले विमले परिकर्मयनर्मजनकमळकम्मुखे ॥
५. मृगमद रसवलितं ललितं कुरु तिलकमळिकरजनीकरे ।
विहित कळङ्क कळं कमलानन विश्रमितश्रम शीकरे ॥
६. घनरुचिरे चिकुरे कुरु मानद मानसजध्वज चामरे ।
रतिगळिते ललिते कुसुमानि शिखण्डि शिखण्डक डामरे ॥
७. सरसघने जघने मम शम्बर दारण वारण कन्दरे ।
मणिरशना वसनाभरणानि शुभाशय वासय सुन्दरे ॥
८. श्रीजयदेव रुचिरवचने हृदयं सदयं कुरु मण्डने ।
हरिचर स्मरणामृतनिर्मित कलिकलुषज्वर खण्डने ॥

### श्लोक:

रचयकुचयोः पत्रं चित्रं कुरुष्व कपोलयोः घटय जघने काञ्चीं अञ्चस्रजं कबरीभरे ।
कलय वलयश्रेणीं पाणौ पदे कुरु नूपुरौ इति निगदितः प्रीतः पीताम्बरोपि तथाऽकरोत् ॥
पर्यङ्की कृत नागनायकफणाश्रेणीनां गणे सङ्क्रान्त प्रतिबिम्ब संवलनया बिभ्राद्विभु प्रक्रियाम् ।
पादाम्भोरुहधारि वारिधि सुतामक्ष्णं दिदृक्षुः शतैः कायव्युहमिवाचरन्नु पचितीभूतो हरिः पातु नः ॥
त्वामप्रप्य मयि स्वयंवरपरां क्षीरोद तीरोदरे, शङ्के सुन्दरि कालकूटमपिबत् मन्दो मृडानीपतिः ।
इत्थं पूर्वकथाभिरन्यमनसो विक्षिप्य वक्षोञ्चलं, राधायाःस्तनकोरकोपरिमिळन्नेत्रोहरिः पातुनः ॥
यद्गान्धर्व कलासु कौशलमनुध्यानं च यद्वैष्णवं, यच्छृङ्गार विकोतत्त्वमपि यत् काव्येषुलीलायितम् ।
तत्सर्वं जयदेव पण्डितकवेः कृष्णैकतानात्मनः, सानन्दाः परिशोधयन्तु सुधियः श्रीगीतगोविन्दतः ॥
यन्नित्यैर्वचनैर्विरिञ्चि गिरिजा प्राणेश मुख्यैर्मुहुः, नानाकार विचार सार चतुरैः नाद्यापि निश्चियते ।
तद्भव्यैर्जयदेव काव्यघटितैः सत्सूक्तिसंशोधितैः, आद्यं वस्तु चकास्तु परं सारस्य सीमाजुषाम् ॥

---

साध्वी माध्वीक चिन्ता न भवति भवतःशर्करे कर्कशासि, द्राक्षे द्राक्ष्यन्ति के त्वाममृतमसि क्षीर नीरं रसस्ते । माकन्द क्रन्द कान्ताधर धरणितलं गच्छ यच्छन्ति भावं यावच्छृङ्गार सारस्वतमिह जयदेवस्य विष्वग्वचांसि ॥

इति श्रीगीतगोविन्दे श्रुङ्गारमहाकाव्ये श्रीकृष्णदासजयदेवकृतौ
स्वाधीनभर्तृकावर्णने सुम्प्रीतपीताम्बरो नाम द्वादशमस्सर्गः
**श्रीगीतगोविन्द महाकाव्यं सम्पूर्णम्**
*******************

## नामावळि

१. मत्स्य कूर्म वराह नरहरि वामन भर्गव नमो नमो ।
वासुदेव रघुराम बुद्ध जय कल्क्यावतार नमो नमो ।
दशविदरूप नमो नमो ।

२. कृष्ण कृष्ण मुकुन्द जनार्दना कृष्ण गोविन्द दामोदर हरे ।
अच्युतानन्द गोविन्द माधव सच्चिदानन्द नारायण हरे ।

३. जय राम कृष्ण गोविन्द जय राम कृष्ण गोविन्द जनार्दन अच्युत परमानन्द ।
अच्युत परमानन्द जनार्दन नित्यानन्द मुकुन्द ।

४. (व्रज) लाललाडली खेलत जमुना तीर ।
फिर फिर नाचत रसभरगावत रासमण्डल अतिगम्भीर ।
राधा प्यारी नन्द दुलारि सहस्र व्रजनारी ।
नूपुर कङ्कण घिणि घिणि भाजत रवि मण्डल उज्यारि ।

५. नाचरे गोपाल नव नारीयाञ्चा क्हेला । व्रज गोपीयाञ्चा मेला ।
हात तुम्बुरु पाय गुङ्गरु । दृम दृम दृम दृम भाजे मृदङ्ग ।

६. नटवर लाल गिरिधर गोपाल । जय जय नन्द यशोदाके लाल ।
सार सार सबसे सार । राधा रसिकवर रास विहार ।
शरद पौर्णिमा निर्मल यमुना । अद्भुत रास महोत्सव अनुपम ।
गौर राधा और घन श्याम । जुगळ शोभा ललाम ।
स्फ्टक स्फटिकमय गोपी मण्डलदाम । गोपि गोपि मध्ये मरकत श्याम ।
धन्य धन्य व्रज नारि धन्यहो । धन्य बृन्दावन कुञ्ज धन्यहो ।
(व्रज) खग मृगतरु सब धन्यहो । व्रजरज यमुना पुळिन धन्यहो ।

७. अहो मधुर अहो मधुर मधुर मधुरहो । राधाकृष्ण रासलील मधुर मधुर हो ।
श्री मुरळीधर मोहन बन्सि मधुर मधुरहो । श्रीव्रज नन्द इन्दु मुगच्छपि मधुर मधुरहो ।

८. मुरळीधर नन्दलाल व्रजयुव जनसङ्ग लोल । प्रभु गिरिधर गोपाल प्रभु गिरिधर गोपाला ॥
९. जलधर समनील वर्ण जय जय कृष्ण । गौरवर्ण कृपा पूर्ण जय जय राधे ।
युगळ रूप मंङ्गळ मय कुञ्ज विहारि । गिरिधर प्रभु प्रेमरस रास विहारि ।
१०. गोवर्धनोद्धारि गोकुल विहारि । गोपी मनोहरा गोकुलेश नन्दना
११. माधवा राधिकेश गोविन्द हरेकृष्णा । श्रीधरा वासुदेव वामन जनार्धन ।
१२. गोविन्द गोविन्द गोविन्द गिरिधारि । श्याम सुन्दर मदन मोहन बृन्दावन विहारि ।
१३. यमुनातीरविहारि बृन्दावन सञ्चारि । गोवर्धनोद्धारि गोपालकृष्णमुरारि ।
१४. राधां विमोहय मुरळीधर । विश्वं विमोहय वंशीगुरो ।
१५. मोहना परिपूर्णा प्रेमानन्द घन राधा मन रमण ।
१६. हे नन्द नन्दन हो नन्द नन्दन । गोपि जन प्राणदन राधा अङ्ग चन्दन ।
१७. गोपवेशोधर गोपाल गोपिका गोपिका जार गोपाल ।
१८. आनन्द धारा श्री राधा राणि । आनन्द धारा श्री राधा राणि ।
रासेश्वरि राधे राधे । मोहन मोहिनि राधे राधे ।
१९. श्री माधुरी श्री माधुरी जय मृषभानु कुमारि । जयवृषभानुकुमारी श्री राधाप्यारी ।
निरतनिकुञ्जविहारी निरतनिकुञ्ज विहारि । श्री राधा प्यारि निभृत निकुञ्ज विहारि ।
२०. जय राधे जय कुञ्ज विहारिणि । मञ्जुळ भषिणि मोहन मोहिनि ।
मदगज गामिनि मन अह्लादिनि । मधुरं मधुरं अहो मधुरस्वरोपिणि ।
२१. चल चल राधे बृन्दावनेश्वरि । निकुञ्ज मन्दिर चल चल ।
पग नूपुर और मणिमालेये । भाजुरहे है गल गल ।
२२. राधे श्याम बोलो जय राधे श्याम बोलो । जय कुञ्ज विहारि, कुञ्जविहारि ।
मुरुळीधर गोवर्धन गिरिधारि । गिरिधारि गिरिधारि गोविर्धन गिरिधारि ।
२३. प्रिय राधे प्रिय राधे – राधे राधे प्रिये प्रिये । प्रिय श्याम प्रिय श्याम – श्याम श्याम प्रिय प्रिय ॥
२४. सुन्दर मुरळि नन्द दुलारि । मन्दर धर व्रज बृन्द विहारि ॥
२५. गोपवेश गोकुलेश गोवर्धन गिरिधारि । गोवर्धन गिरिधारि मुरारि मञ्जुळ कुञ्ज विहारि ।
२६. श्री व्रज नायक सुधा संरक्षक । गोकुल बालक गोपिका वल्लभ ॥
देव देव देव देवकीबालक । दामोदराच्युत नमो नन्दात्मज ॥
२७. मुकुन्द माधव जय घन श्याम । देवकी नन्दन राधे श्याम ॥
राधेश्याम भजे राधे श्याम । मुरळी मनोहर मेघ श्याम ।
२८. गोविन्द बोलो हरि गोपाल बोलो । राधारमण हरि गोविन्द बोलो ॥
२९. जयकृष्ण जयकृष्ण जयकृष्ण जयहो । जय राधे जय राधे जय राधे जय हो ।
व्रज राज नन्द राज आनन्दकन्द । वृषभानु नन्दिनि नव किशोरी ।
३०. कृष्णा करुणालोल गोवर्धन गिरिधर गोपाल ।
३१. व्रज राजकुमार श्याम वृशभानु कुमारिनाम् । श्रीराधाप्यारी कृष्ण मनोहारी ।

-------------------------------------------------------------------

कनक केतकि रायि श्याम मरकत कान्ति । कन्दर्प दर्प कचोर कन्दर्प दर्प कचोर ।

३२. राधा माधव व्रज वासीरे । राधिकाचरण आह्मि दासीरे ।

३३. व्रज गोप गोपी रमण । जय कृष्ण चन्द्र जय राधा रमण ।
सुगन्ध कस्तूरि तिलक । मधुर मुरळीधर नाथ यदुनाथ ।

३४. कल्याण कृष्ण कमनीय कृष्ण काळिङ्गनर्तन श्रीकृष्ण ।
गोवर्धनगिरिधारि मुरारि गोपीजनमनसञ्चारि ।
बृन्दावन श्रीतुळसीमाल पीताम्बरधारि मुरारि ।
श्यामसुन्दर जगदोद्धार सज्जन परिपाल दयाळ ।
नन्दकुमार नवनीतचोर नाद वेणुलोल कन्हय्या ।

३५. जय राधारमण राधारमण जयदेव जगन्नाथ जय राधारमण ।

**गोविन्द नाम सङ्कीर्तनम् । गोविन्द । गोविन्द ।**
**गोपिका जीवन स्मरणम् । गोविन्द । गोविन्द ।**

*******************

## श्री पार्थसारथि स्तुति

नख नियमित कण्डु न् पाण्डवस्यन्दनाश्वान् अनुदिनं अभिषिञ्चन् अञ्जलिस्थेः पयोभिः ।
अवतु विततगात्रस्तोत्र निस्योत मौलिः दशन विधृत रश्मिः देवकी पुण्यराशिः ॥

| राग : तोडि | ताळम् : आदि |
|---|---|

प. भजत प्रेम कृपानिधि माधवं पाण्डव सारथि वेषम् ।

अ. सादर मीक्षितममरै राजौ करतलतोत्र विभूषम् ।

१. कमलाकुच कलशोपरि चिन्हं करजकुलैरचयन्तम् ।
तैर्विजयाश्वान् नियमितकण्डून् प्रेम्णा युधि कलयन्तम् ॥

२. यत्कर पल्लव परिकलितानि शङ्ख गदाब्ज चक्राणि ।
तत्कर सम्पुट सम्भृत पयसा सिञ्चति तुरगाङ्गानि ॥

३. येन ससर्ज जगद्गुरुरादौ निगम कदम्बं अशेषम् ।
तेन मुखेन करोति हयान्प्रति हो हो हो इति घोषम् ॥

४. यत्पद पङ्कजं अपि कमलायाः मुनिमनसामपि दूरम् ।
तेनयुधिष्ठिर दौत्य निमित्तं कुरुते कुरुपुरि चारम् ॥

५. त्यक्त्वास्वधर्मं आश्रित दयया भीष्म प्रतिज्ञा परिपाल ।

--------------------------------------------------------------------

तुरग रजश्छुरितालक जालं श्रमजल बिन्दु कपोलम् ॥
६. दीनदयापरं आर्त शरण्यं भक्तजनावन लीलम् ।
कुन्ति सुत परिपालन लोलं भद्राचल गोपालम् ॥

## नामावळि

१. कृष्ण मुरारे केशव मुरारे माधव हरे मुकुन्द गोविन्द मुरारे ।
श्रीधर दयानिधे राधायारि सारथे राधा चुम्बित मधुराधर मुरारे ॥
२. मन्दहसित इन्दुवदन सुन्दरकृष्ण, सुन्दरकृष्ण नन्द नन्दन कृष्ण ।
वैजयन्ति मालाङ्कित श्यामळगात्र, श्यामळगात्र परम पुण्य चरित्र ।
मङ्गळनाम मङ्गळरूप माधवकृष्ण, माधव कृष्ण मनमहोन कृष्ण ।
मणिनूपुर कलितपाद उरतरळितहार, उरतरळितहार नव मनोहरलील ।
देव देव वासुदेव दास जनप्रिय, मीरा दासिमन निवास जयरासविहार ।

**गोपिका जीवन स्मरणम् । गोविन्द । गोविन्द ।**

*******************

## श्री नारायणतीर्थ तरङ्गिणि
## ध्यान श्लोकगळु

१. यधङ्घ्रि पङ्केरुह रेणुलग्नं निपीय नीरं विमलान्तरङ्गः ।
जानामि तत्वं निजमात्मरूपं तं नौमि नारायणतीर्थमार्यम् ॥
२. यन्नाम्नः पठनं मनागपि यतेः ॐकार लक्षाधिकं, यन्मूर्तेरपि पूजनं हरिहर ब्रह्मादि पूजास्मृतम् ।
यत्कारयं त्रिवधं समस्त जगतां शास्त्रर्थनिर्णायकं, श्रीनारायाणतीर्थ सद्गुवरं तं नौमि मुक्तिश्रियै ॥
३. वेदान्तार्थविचारगम्यधिषणा विध्वस्तभेदाशयं नानातन्त्रपदार्थसंशय घनध्वान्तार्कतुल्यं गुणैः ।
नानादेशदिगन्त सततयशः प्राप्तावकाशं गुरुं श्रीनारायणतीर्थसद्गुरुवरं तं नौमि मुक्तिश्रियैः ॥

१. शरणमुपगताहं त्वां शरण्यं जनानां निखिल भय वियोगं योगि चिन्त्यं महान्तम् ।
सुररिपुगणभारं दुस्सहं दुर्भरं मे परिहर परमात्मन् भक्ति सिद्धैक मूर्ते ॥

| राग : सौराष्ट्र | ताळम् : आदि |
|---|---|

च. शरणं भव करुणा मयि कुरु दीनदयाळो । करूणारसवरुणालय करिराजकृपाळो ।
अ. अधुना खलु विधिना मयि सुधिया सुरभरितम् । मधुसूदन मधुसूदन हर मामकदुरितम् ।
१. वरनूपुरधर सुन्दर करशोभितवलय । सुरभूसुरभयावारक धरणीधर कृपया ।

---

त्वरया हर भरमीश्वर सुरवर्य मदीयम् । मधुसूदन मधुसूदन हर मामकदुरितम् ॥
२. घृणिमण्डलमणिकुण्डल फणिमण्डलशयन । अणिमादिसुगुणभूषण मणिमण्डपसदन ।
विनतासुतघनवाहन मुनिमानसभवन । मधुसूदन मधुसूदन हर मामकदुरितम् ॥
३. अरिभीकर हलिसोदर परिपूर्णसुखाब्धे । नरकान्तक नरपालक परिपालितजलधे ॥
हरिसेवक शिवनारायातीर्थ परात्मन् । मधुसूदन मधुसूदन हर मामकदुरितम् ॥

२. क्षीराब्धि मध्य भुजगेन्द्र महासनाय देवाय नाभिकमलोदित पद्मजाय ।
योगिन्द्र भाव्य गगनामल नित्य बोध भूमाभिदाय परषाय नमः परस्मै ॥

| राग : आन्दभैरवि | ताळम् : त्रिपुट |
|---|---|

प. नारायणाय नमो माधवाय, नारायणाय नमो ।
अ. नागेन्द्रशयनाय, नन्दिताखिल लोकाय ॥
१. नाभिकमल जनितविधि मुखाय – नूतन जलधराभाय
नानाचराचर नारी नर रूपाय नारदादि मुनिवन्द्य आनन्द घनमयाय ॥
२. अगणित गुणगणाय आगमगेयाय – विगळितभयशोकाय
गगन निर्मल बोध गम्भीरभावाय भगवद्भक्त हृदय पद्म भानु रूपाय ॥
३. करुधृत रथचरण कम्बु पङ्कज – कौमोदकी शार्ङ्गाय
निरवद्य गळशोभि निज कौस्तुभ भूषाय परिहृत परपक्ष पक्षिराज वाहाय ॥
४. जगदेक नाथाय जातमदनाय – जितवैरिमण्डलाय
निगम निश्वासाय नित्यानन्दरूपाय निरुपमगोकुल नीतनवनीताय ॥
५. आमयादि विरहितायाखिलमयाय – कामकोटि सुन्दराय
नामरूपरहिताय भूमस्वरूपाय सोमसूर्यनयनाय सामगानगेयाय ॥
६. वारिजलोचनाय वासुदेवाय – वरमुनिपारिजाताय
करुणाकरभक्तकारूण्यसाराय नारायणतीर्थ नतचरणाब्जाय ॥

३. देवक्याः शिशुभावमेत्य भगवान् नारायणः श्रीपतिः, सर्वज्ञान महाविभूति सहितः स्सत्प्राधनैः
कर्मभिः । आदित्येन्दु सहस्र कोटि सदृशा भासा गृहं भासयन् पित्रोः स्नेह सुधा महोदधि
शशाङ्कोयं हरिर्गीयते ॥

| राग : केदारगौळ | ताळम् : आदि |
|---|---|

प. मङ्गळालय मामव देव पङ्कजासनभावितभाव ।
१. देवकी वसुदेव वरतनूज । दिव्य किरीट दळित भवबीज ।
सर्वयोगि विचिन्त्य पदाब्ज । सङ्गताशेष साधुसमाज ।

---

२. अपरिमितानन्द बोध स्वरूप । अति करुणा विधृताद्भुतरूप ।
कपट दैत्यहर खण्डितपाप । कनकाम्बरधर कपटदुराप ।
३. मकरकुण्डल केयूरादिविभूष । मनसिज शतकोटि मञ्जुल वेष ।
विकचकमळ सदृशायताक्ष । विमल गोकुल गोपाखिलरक्ष ।
४. कलितश्रीकौस्तुभ कमनीय कण्ठ । करुणारसभर मिळित वैकुण्ठ ।
परिपालय भूरि भाग्यवितरण । गुरुभक्त शिवनारायणतीर्थ शरण ।

४. कंसने प्रेरिता काचित्पूतना शिशुघातिनी । कृष्णं स्तनन्धयं मत्वा तस्मै स्तन्यविषं ददौ ॥
तद्भावं सर्वविद्ज्ञात्वा स्तन्यपानमिषेण ताम् । जघान सापदत्भूमौ दर्शयन्त्यासुरीं तनुम् ॥
ततोदृष्ट्वा जगन्नाथं गोपबालमिव स्थितम् । चकृस्स्वस्त्ययनं तस्य गोपगोप्योऽपि तं जगुः ॥

| राग : नादनमक्रिय | ताळम् : झम्पे |
|---|---|

प. मङ्गळानि तनोतु मधुसूदनस्सदा गङ्गाधरोऽपि तव सापि गङ्गा ॥
अ. श्रुङ्गारवारिधे श्रीवत्सकौस्तुभालङ्कार शिशुभाव भयविभङ्ग ॥
१. अस्तु ते भद्रमिह दुस्तर भवाम्भोधि–विस्तर भयापहर वस्तु सुखद
कस्तूरिका तिलक विस्तीर्णफाल जगदस्थिता पादक सदास्तरहित ॥
२. अक्षीण सम्पदिह रक्षतु धरेय मथ शिक्षतु हरिस्तव विपक्षनिचयम्
दक्षिणामूर्तिरपि दाक्षिण्यमवहतु वीक्षतां त्वां सकलसाक्षि सदयम् ॥
३. दुर्गाणि वारयतु दुर्गा सरस्वती भर्गोऽपि भर्जयतु पापवर्गम्
सर्गादिसकल संसर्गसाधकमिह मार्गस्सदाऽवतु तवापवर्गम् ॥
४. परिपूर्ण बोधरस परिपन्थि हरसरस निरवधिक सम्पदं दिशतु भूमा
विरचितमिदन्तु शिवनारायणानन्द तीर्थेन परमपुरुषार्थ फलिना ॥

५. गोविन्द घटयानन्दं परमाम्नाय गोचर । श्रीनन्दतनयाशेष योगिधेय पदाम्बुज ॥

| राग : भैरवि | ताळम् : झम्पे |
|---|---|

प. गोविन्द घटय परमानन्दमृत मिह हरे ।
अ. श्रीनन्दतनय बहु योगीन्द्र सुरविनुत ।
१. अगणित गुणग्राम अपरिमित निजकाम । निगम परमाराम निखिलमोह विराम ।
नगधर घनश्याम नतजन कमुदसोम । अघहरण सर्वसम असुरमण्डल भीम ।
२. नव मौक्तिकाहार नन्दगोप कुमार । भवबन्धन विदूर भद्रद सुखाकार ।
अवनत जनाधार अनुपम शुभाचार । नवनीतचोर नरनायणावतार ।

---

३. परमपुरुषाशेषपाल परिजनतोष । परिहृताखिलदोष पतगवाहन शेष–
पर्यङ्क मृदुभाष परम मङ्गळ वेष । निरवद्य गोपपुरि नियत वरमणिभूष ।
४. शरदिन्दु समवदन शतमन्मथसमान । गुरुतरानन्दघन कुन्द सुन्दर रदन ।
परिपन्थि गण दळन पालिताखिल भुवन । सरस नारायणतीर्थ सत्य फलदान ।

६. परमकरुणया मां पालय त्वां प्रपन्नम् निजपरिजनकामं पूरयाचिन्त्यकीर्ते ।
निरवधिक कृपाब्धे निर्मलानन्दमूर्ते भव जलधि निमग्नं दीनमुद्धारयेश ॥

| राग : सौराष्ट्र | ताळम् : आदि |
|---|---|

प. परम करुणया मां पालय कृष्ण भक्तमनोरथं पूरय ।
अ. परिपन्थि गणमिह वारय भव सागरा पतितं तारय ।
१. मधुकैटभादि विजयादर मत्स्य कूर्मादि रूपसादर ।
अधिक दयाऽवलोक सुन्दर अपरिमितानन्द सागर ॥
२. अखिलाण्डकोटि परिपालक अनवद्य गोकुल नायक ।
अघहरण दुष्ट निवारक आश्रित जन समुद्धारक ॥
३. तरळमणि मकरकुण्डल ताण्डव नटन कृत मण्डल ।
सरस परिपालिताखण्डल साधु गोकुलवर स्थण्डिल ॥
४. अवनिमण्डल भार खण्डन कृष्ण आश्रित जन हृदय मण्डन ।
धृवविभूति दान विचक्षण शिवनारायणतीर्थ रक्षण ॥

७. हृतेषु वत्सबालेषु ज्ञात्वा विधिविचेष्टेतम् । तन्मातृस्तोषयामास स्वयं वत्सादिदेहभाक् ॥
इत्थं भुतं हरि दृष्ट्वा वत्सरान्ते विधि स्वयम् । सन्दर्शित जगत्कोटि शरीरं स्तौति सादरम् ॥

| राग : कुरञ्जि | ताळम् : आदि |
|---|---|

प. जय जय गोकुल बाल जय सकलागम मूल । दयया मां गोपाल दीनं पालय बाल ॥
१. देवमयाचरितमिदं दीन दयाऽपराधम् । श्रीवसुधाधव कृपया केवल मेवधुनीहि ॥
२. ईक्षे तावकदेहे ईश जगन्ति निरीहे । वीक्षाशिक्षित मोहे वेदान्तातुल गेहे ॥
३. जगदण्ड कोटितनो जगदुदरान्तर सुतनो । अगणित सञ्जातमनो अपरिमिताश्रितधेनो ॥
४. वितर मयीश्वर करुणां विघटय मोक्षावरणम् । सततं मे भव शरणं साधय संसृति तरणम् ॥
५. इति विधिना परिगीतं श्रुतिवचसा हरिचरितम् । यतिनारायणकथितं यदुकुल भूषणमुदितम् ॥

८. यज्ञ पत्न्यस्तु गोपालं गोपीजन मनोहरम् । भोजयित्वाऽथ सन्तुष्टं विहिताञ्जलयोऽस्तुवन् ॥

---

| राग : मोहन | ताळम् : आदि |
|---|---|

प. बालगोपालकृष्ण पाहि पाहि ।
अ. नीलमेघशरीर नित्यनन्दं वैभवं देहि ।
१. कलभसुन्दरगमन कस्तूरी शोभितानन । नळिनदळायतनयन नन्दनन्दन ॥
मिळित गोप वधूजन मीनाङ्कोटि मोहन । दळित संसार बन्धन दारुण वैरि नाशन ॥
२. यज्ञ यज्ञ संरक्षण यादव वंशाभरण । यज्ञ फल वितरण यमिजन शरण ॥
अज्ञान घन समीरण अखिललोकैक कारण । विज्ञान दळितावरण वेदान्त वाक्य प्रमाण ॥
३. व्यत्यस्त पादारविन्द विश्व वन्दित मुकुन्द । सत्याखण्ड बोधानन्द सद्गुण बृन्द ॥
प्रत्यस्तमित भेदकन्द पालित नन्द सुनन्द । नित्यद नारायणतीर्थ निर्मलानन्द गोविन्द ॥

९. अन्यापि युवति काचिदन्यादृशगिराहरिम् । धन्या सम्बोधयन्यद्धा सन्यां प्राह सादरम् ॥

| राग : पुन्नगवराळि | ताळम् : आदि |
|---|---|

प. भूयो भूयो याचेऽञ्जलिना । भूमन् त्वयिमे दास्यं देहि ॥
१. निमिषार्धमपि तवदर्शन विधुरा । निन्द्याहि तनुरेषा ।
तामरसेक्षण तवपादकमले । तनुतां तनुतां मम तनोरतुलाम् ॥
२. कान्तं कान्तारं अपितव योगे । कमलेक्षण मन्ये ।
कान्तारं गृहं अपितु वियोगे । करुणा तरुणी मयि तव भवतु ॥
३. वरयामि गोपालवल्लभ । मधुनात्वरयाहं अखिलगुरुम् ।
सरसगिरा गोपयुवती कथितमिति । गुरु कृपया नारायणतीर्थ फणितम् ॥

१०. सानन्दं नन्दसूनु सकल जनिमतां सारमारादुपास्यम् । दास्योलास्यं रसाढ्याः करतलकलितै
स्ताळवाद्यैः सुगीतैः ॥ कुर्वन्त्यो निर्विशङ्काः कुवलय सुदृशो दिव्य ताटङ्कवत्यः । बृन्दारण्ये भजन्ते
सुरवरनिताः तञ्जगुः स्यन्दनस्थाः ॥

| राग : भैरवि | ताळम् : झम्पे |
|---|---|

प. गोविन्दमिह गोपिकानन्दकन्दं सानन्दमवलोकयामो मुकुन्दम् ।
१. गोपिकागण नयन कुमुद पूर्णेन्दुं, गोपाल कुलतिलकं अखिल जनबन्धुम् ।
श्रीपतिमनिन्द्य हरिचन्दन सुगन्धिं, श्रेयोविधायि करुणारस सिन्धुम् ।
२. सङ्गीत रसरसिक सरस सल्लापं, सरळमुरळी गळित साधु सन्तापम् ।
श्रुङ्गार रसपूर श्रीमदन गोपं, श्रित जनानन्दमखिलानन्द रूपम् ।
३. अङ्गनामुख पद्म सङ्गी भृङ्गाक्षं, आलोल मकरकुण्डल नटनदक्षम् ।

---

---

मङ्गळाकरमखिल लोक संरक्षणं, माधवमशेष सुररिपुगण विपक्षम् ।
४. वल्लवी माणिक्य मणियुगळ मध्ये, मरकत मणिच्छाय मदन गोपालम् ।
मल्लिका जाजि चम्पकादि सुम भारं, महनीय लावण्य ललिततर पूरम् ।
५. स्फुरदधर कलित मुरळीनाद सुधया, सुरसुन्दरी गणमिहाकर्षयन्तम् ।
गुरुकरुणया रचितं एतत् अतिललितं, नारायणानन्दतीर्थ समुदितम् ।

११. श्रीहरिचरणसरोजे हृदयसरोजे निधायभूयोऽपि । गायति नन्दकुमारं सम्बोध्यानन्यभक्तियुक्तात्मा ।

| राग : बिलहरि | ताळम् : आदि |
|---|---|

प. भावये हृदयारविन्दे तावक पदारविन्दे ।
अ. देव गन्धर्वादि ब्रुन्द सेवित मा मव मुकुन्द ।
१. सकललोक नायक साधुजनतारक मकरकेतु जनक माया धारक ।
विकटारि विदारक वेद समुद्धारक विकृत भयवारक विपुलसुख दायक ।
२. कनकमय दुकूल कलितकल्याण जाल मुनिमानसानुकूल मुरळीलोल ।
विनयादि गुणशील वेद पुराणादि मूल वीर विजयगोपाल विगत शोकादि मूल ।
३. काळिन्दी तटविहार करूणारस सागर मिळित गोपी निकर मेरुसमधीर ।
काळीय मदहार कंसादि भयङ्कर गोकुलश्रीमन्दिर कोटिकामसुन्दर ।
४. भक्तजन संरक्ष परम करुणावीक्षा–भक्तजन सुशिक्ष साधुजनपक्ष ।
रक्तकमल पत्राक्ष रमणीय चरणदक्ष भक्त नारायणतीर्थ भव भय बन्धमोक्ष ।

१२. इत्तं भूतं हरिं दृष्ट्वा वत्सारन्ते विधिः स्वयम् । सन्दर्शितजगत्कोटिशरिरं स्तौति सादरम् ॥

| राग : मोहन | ताळम् : आदि |
|---|---|

प. जय जय बालगोपाल जय जय मदनगोपाल । जय जय विजयगोपाल जय जय कल्याणगोपाल ॥
१. निरुपमगुण रत्नकाश नित्य निर्मल कीर्ति पूरिताश । शरनिधि मध्य निवेश सारस नेत्र लक्ष्मीश ॥
२. ब्रह्मादि सुरपूज्यपाद पातकजलविभेद । ब्रह्मण्यदेव धृतवेद बलभद्रावरज भक्तवरद ॥
३. परिजनहृदय प्रभाव परिचित मुरळीराव । चरित पुण्यैकसेव शिवनारायणतीर्थदेव ॥

१२. करिष्यामः शिशोरस्य मङळाचरणं वयम् । स्मरिष्यामः देवं लक्ष्मीनारायणं मुदा ॥

| राग : केदारगौळ | ताळम् : आदि |
|---|---|

प. कलय कल्याणानि नारायण । बलभद्रावरजाय नारायण ।
१. सरसिजनयनाय सकललोकहिताय । नरलोकसम्भवाय नारायण ।

---

शरदिन्दुवदनाय शतमन्मथसमाय । निरवधिकगुणाय नारायण ॥
२. नन्दगोपसुताय नगराजधीराय । सुन्दरचरणाय नारायण ।
इन्दिरामन्दिराय ईप्सितफलदाय । चन्दनादिगन्धिताय नारायण ॥
३. गुरुतरकरुणाय गोकुलभूषणाय । परिजनपालनाय नारायण ।
निरुपमसुन्दराय नीलमेघनिभाय । परमपुरुषलक्षणाय नारायण ॥
४. नवपल्लवकराय नवमणिभूषिताय । कविजननायकाय नारायण ।
अवनीवल्लभाय आश्रितवत्सलाय । शिवनारायणतीर्थ संसेविताय ॥

१३. जानुभ्यां पाणिपद्माभ्यां व्रजन्तं नन्दनन्दनम् । आनन्दयन्तमबलाः सबलं परमं जगुः ॥

| राग : मोहन | ताळम् : छापु |
|---|---|

प. माधव माधव कृष्ण मङ्गळाय श्रीकृष्ण ।
अ. साधकफलद कृष्ण सबल श्रीकृष्ण ।
१. नन्दनन्दन मुकुन्द सुन्दरमुखारविन्द । नन्दितगोपिकाबृन्द नतजनानन्द ॥
इन्दिराहृदयानद इन्दुवदन गोविन्द । मन्दरधर सुनन्द वन्द्य सानन्द ॥
२. दिव्यकस्तूरीतिलक दीनजन परिपालक । भव्ययोगिभयवारक भक्तोद्धारक ॥
अव्ययभूतिदायक अगणितलोकनायक । नव्यनवनीतरसिक नन्दबालक ॥
३. चारुनूपुरपकमल चरण बालचापल । सरससद्गुणजाल संगतलील ॥
नीरदनील निर्मल नित्यशुद्धागममूल । नारायणतीर्थ बाल नटजनालोल ॥

१४. वैमानिकाः परं तत्वं मत्वा गोपालनन्दनम् । परस्परं जगुर्भक्त्या गोवत्सानुचरं हरिम् ॥

| राग : पन्तुवराळि | ताळम् : रूपक |
|---|---|

प. कलयत गोपीकारुण्यरसपूर कालमेघाभिरामम् ।
अ. चलदधराञ्चित चारुमुरळीनाद फलितकैवल्यकामं गोपालम् ।
१. कुत्सितासुरतिमिरकोटिसूर्यं अमरकुमुदबान्धवम्
मत्स्यकूर्मादि श्रीमहनीयाविर्भाव मायोल्लसितवैभवम्
सत्सुखामृतजलधि सततखेलननिरतं साधुजनात्मदेवम्
वत्ससंरक्षण वात्सल्यपरिपूर्णं वल्लवबालभावं गोपालम् ॥
२. अक्षीणसम्पदामाश्रयं अखिलसंरक्षणदीक्षाधम्
पक्षीशवाहनं पङ्कजभव भावितभद्राकारम् ।
कुक्षिस्थब्रह्माण्डकोटिविराजितं कुटिलकुन्तलसुन्दरम्

---

वीक्षणसमुदित विविधविश्वाकारं विमलविज्ञानसारं गोपालम् ॥
३. करसरोरुहगत कनकनिर्मितवलय कमनीयतरविग्रहम्
गुरुतरमौक्तिकं गुणमणिगणभारं गोपीसन्तापापहम् ।
सुरराजरिपुवत्सासुरसूदनाचरित सुललितमतिसुग्रहम्
वरनारायणतीर्थ वरणीयपरमार्थावरमोहविनिग्रहं गोपालम् ॥

१५. भागिनेयिमसौ दृष्ट्वा दुष्टात्मा तत्र मन्दिरे । गृहित्वा पादमेतस्याः क्षेप्तुं भूमौ मनो दधे ॥
पदा संताड्या कंसं सा योग माया सुदुर्नयम् । अन्तरीक्षिं गता विष्णोः दुर्गाद्भुत् संस्तुतामरैः ॥
दुर्गे दुर्गतिहारिणि त्रिजगतां सर्गादिसिद्धार्तके । स्वर्गादीष्टफलप्रदाननिपुणे त्रायस्व नः शङ्करि ॥
सा त्वं सर्वजनान्तरान्तराचिदं शानन्यसिद्धात्मिका। सारासाराविवेकदृष्टिविदिता सर्वैकसाक्ष्यात्मिका ॥

| राग : आहिरि | ताळम् : छापु |
|---|---|

प. जय जय दुर्गे जितवैरिवर्गे ।
अ. वियदनिलादिविचित्रसर्गे ॥
१. सुन्दरतरचरणारविन्दे सुखपरिपालितलोकबृन्दे ।
नन्दसनन्दादियोगिवन्द्ये नारायणसोदरि परमानन्दे ॥
२. सरसमणिनूपुरसङ्गतपादे समधिगताखिलसाङ्गवेदे ।
नरकिन्नरवरसुरबहुगीते नन्दसुते निखिलानन्दभरिते ॥
३. कनकपटावृतघनतरजगने कल्याणदायिनि कमनीयवदने ।
इनकोटिसङ्काशदिव्याभरणे इष्टचजनाभीष्टदाननिपुणे ॥
४. अनुदयलयसच्चिदानन्दलतिके आलोलमणिमयताटङ्कधनिके ।
नरनारीरूपादिकार्यसाधनिके नारायणतीर्थभावितफलके ॥

## नामावळि

१. हरे मुरारि मधुकैट भारे । गोविन्द गोपाल मुकुन्द शौरे ।
श्रीधर माधव गोविन्द केशव । भक्त उद्धारणा त्रिविक्रम हरे ।
२. नारायण नारायण जय जय गोविन्द हरे । नारायण नारायण जय जय गोपाल हरे ॥
३. देवकी वरबाल प्रभो मुरारि गोपाल । भुवन मोहन श्यामळरूप पुण्य चरित्र परम पवित्र ॥
४. देवदेव देवकृष्ण दीनबन्धु पाहिमाम् । नीलमेघ श्यामकृष्ण नित्य मुक्त रक्षमाम् ॥
वेणुगान लोलकृष्ण विमलनाथ पाहिमाम् । विश्वरूप वासुदेव वीरराम रक्षमाम् ॥
पूतनासंहार कृष्ण भुवनाथ पाहिमाम् । इन्दुवदन मन्दहास ईशकृष्ण रक्षमाम् ॥
नन्द नन्दन मुकुन्द राधा राधाकृष्ण पाहिमाम् । पुण्डरीक नयन कृष्ण पुण्यरूप रक्षमाम् ॥

५. चित्तचोर यशोदकेलाल नवनीत चोर गोपाल । गोपाल, गोपाल, गोवर्धनधर गोपाल ॥
६. नन्दलाल आनन्दलाल नवजलधरसमनील । गोपाला गोपाल गोपीजन हृदय विलोल ॥
७. नन्द नन्दन मुकुन्द मुरारे । आनन्द कन्द व्रज मोहन शौरे ।
८. गोपाल गोपाल । गोकुल नन्दन गोपाल । नन्द मुकुन्द गोपाल । नवनीतचोर गोपाल ।
यशोदबाल गोपाल । यदुकुलतिलक गोपाल । वेणुविलोल गोपाल । विजयगोपाल गोपाल ॥
९. गोपल वेष गोकुलोष गोवर्धन गिरिधारि । पाप निर्मूल भक्तानुकूल पाहि श्री गोपाल सुशील ॥
१०. गोविन्द गोपाल देवकी वर बाल ।
११. गोविन्द सुन्दर मोहन दीनमन्दार गरुडवाहन ।
भवबन्धादि दुष्कर्म दाहन भक्तवत्सल त्रैलोक्य पालन ॥
१२. गोपी जन नाथ गोपाल बाल गोविन्द मधुसुदना ।
तापरहित शरश्चन्द्र समवदन गोपाङ्गना मोहना जनार्दन ॥
१३. गोपी लोल गोकुबाल गोवत्स परिपाल । पापनिर्मूल भक्तानुकूल । पाहि श्रीगोपाल ।
१४. गोपकुमार गोप किशोर गोकुल बृन्दावन सञ्चार ।
पाप निर्मूल भक्तमन्दार पाहि परात्वर पालित धीर ॥
अम्बुज नयन कुञ्जर गमन शम्भुहृत्सदन शशिनिभवदन ।
कम्बु कन्धर वनमालिकाभरण अम्बुधि शयन अमरवरेण्य ॥
१५. जय जय जय यदुवंश दुलारे । लीला ललित मनोहर प्यारे ।
भुवन मोहन प्रभु सन्त सहायक । गावत वेद पुराण पुकारे ।
नन्दके लाल यशोदाके बाल । गोपी गोपाल बाल जय व्रजलाल ।
१६. हे गोविन्द हे अनन्त नन्द गोपाल । मोहन मुरळीधर श्याम गोपाल ।
मन्दर गिरीधारि हरे नटवर लाल । माधव केशव मदन गोपाल ।
१७. कृष्ण गोविन्द गोप गोपी जन वल्लभ ।
श्याम सुन्दर जगन् मोहन राधा रमण राधा वल्लभ ।
१८. कल्याण कृष्ण कमनीय कृष्ण । काळियनर्तन श्रीकृष्ण ।
श्याम सुन्दर जगदोद्धार । सज्जन परिपाल दयाळ ।
गोवर्धनगिरिधारि मुरारि । गोपीजनमनसञ्चारि ।
बृन्दावन श्रीतुळसीमाला । पीताम्बरधारि मुरारि ।
नन्दकुमार नवनीत चोर । नाथ वेणुलोल कन्हय्या ।

**गोपिका जीवन स्मरणम् । गोविन्द गोविन्द ।**

## श्री भद्राचल रामदास कीर्तनेगळु

| राग : सावेरि | ताळम् : आदि |
|---|---|

प. श्री रामुल दिव्य नामस्मरण जेयुचुन्न चालु । घोरमैन तपफलमुल् कोरनेटिके मनसा ॥
अ. तारक श्रीरामनाम ध्यानमु जेसिन चालु । वेरुवेरु दैवमुलनु वेदक नेटिके मनसा ।
१. भागवतलु पादजलमु पैन चल्लुकोन्न चालु । भागीरथिकि पोवलनुचु भ्रान्तियेटिके मनसा ।
भागवतमु जिह्वानुञ्चि पठनजेयुचुण्टे चालु । बागु मीरिनट्टि अमृत पानमेटिके मनसा ॥
२. परुलहिंस सेयकुन्न परम धर्ममन्ते चालु । परुलनु रक्षिन्तामनि पलुक नेटिके मनसा ।
दोरकोनि परुलधनमु दोचकयुण्डिन चालु । गुरुतुगानु गोपुरमुलु कट्टि नेटिके मनसा ॥
३. परग दीनजलयन्दु पक्षमुञ्चिनदे चालु । परामात्मुनि यन्दु प्रीति बेट्ट नेटिके मनसा ।
हरिदासुलकु पूजलु आचरिञ्चिननु चालु । हरिनि पूजचेतुनने अहमदेटिके मनसा ॥
४. जपतप अनुष्टानमुलु सलिपिरि मूढुलकै बुधुलु । जगदीशुनि दिव्यनाम चिन्तनकोसरमै ।
चपलमुलेक एवेळ चिन्तिञ्चे महात्मुलकु । जपतप अनुष्टानमुलु सेयनेटिके मनसा ॥
५. अतिथिवच्चि आकल्यण्टे अन्नमिन्त इडिन चालु । क्रतवुलेन्यो सेयवलनु काङ्क्षिलेटिके मनसा ।
सततमु मा भद्रागिरि स्वामियै युण्डिन चालु । इतर मतमुलने एटि व्यतलनेटिके मनसा ॥

| राग : वसन्त | ताळम् : आदि |
|---|---|

प. रामजोगि मन्दु गोनरे पामरुलारा । रामजोगि मन्दु गोनरे ।
१. रामजोगि मन्दु मीरु प्रेमतो भुजिञ्चिनपुडे । काम क्रोध लोभ मुलनु गडकु बारदोले मन्दु ॥
२. मद मत्सर मोह मुलनु माटलो निलिपेटे मन्दु । गुदिगोन्न कर्ममुलनु गूडक एड तोले मन्दु ॥
३. काटुक कोण्डलवण्टि कर्ममुलेडबापे मन्दु । साटिलेदु जगमुलन्दु स्वामि रामजोगि मन्दु ॥
४. कोटिधनमुलित्तामनि कोनबोयिन दोरकनि मन्दु । साटिलेनि भागवतुलु स्मरण जेयुचुण्डे मन्दु ॥
५. वेषधारि मायलने व्यतल वदलिञ्चेटि मन्दु । पाषण्ड दुर्मागुलनु पावनुल जेयिञ्चे मन्दु ॥
६. पदरक श्रीहरि भक्तुलु पठन गाविञ्चेटि मन्दु । मुदमुन मूर्ख जनलकु मोक्षमोसगेटि मन्दु ॥
७. प्रेमतो भद्राचलमन्दु पेद साधुलकिच्चे मन्दु । रामदासुकु प्रियमैन श्रीराम मन्त्रमने मन्दु ॥
८. मुदमुतो भद्राद्रियन्दु मुक्तिनिपोन्दिञ्चे मन्दु । सदयुडैन रामदासु सद्भक्तितो कोलिचे मन्दु ॥

| राग : शङ्कराभरणम् | ताळम् : चापु |
|---|---|

प. तगुनय्य दशरथ रामचन्द्र दय दलचवेमि – नीकु

---

पगवाडना येन्तो पति मालिन गानि पल्कवेमि ।
१. नगुमोमु जूपरा नायन्न निनु चालनम्मिनानु – इन्त
अगडुग जूचिते आवल येवरि पालय्य नेनु ।
२. पतितुल नेल्ल पावनुल जेयुदुननि पलुकनेल – इप्पु
डति घोरखलुल मनुचु मम्मुल विडनाडनेल ।
३. अन्नन्नगानि राकुन्नावु ओराम निन्नुमान – ने
निन्नेगानि परुल नेन्न बोनु ना कन्नुलान ।
४. पदपडि मिमुजेरबडिनवारलनु जेपट्टलेदा नन्नु
वदलिते मीवण्टिवारिकि यपकीर्ति वादुगाद ।
५. अनुदिनमु भद्राद्रिधामुडवनि निन्नरसिनानु – नेनु
विनयमुतो रामदासुडननि विन्नविञ्चिनानु ।

| राग : आनन्दभैरवि | ताळम् : आदि |
|---|---|

प. पलुके बङ्गार मायेना, कोदण्डपाणि पलुके बङ्गार मायेना ॥
१. पलुके बङ्गारमाये, पिलचिन पलुकवेमि कललो नी नामस्मरण, मरव चक्कनि तण्ड्रि ॥
२. इरवुगा निसुकलोन, पोरलिनयुडुत भक्तिकि करुणिञ्चि ब्रोचितिवनि, नेरनम्मिति निन्ने तण्ड्रि ॥
३. राति नातिग जेसि, भूतलमन्दुन प्रख्याति जेन्दितिमनि, प्रीतितो नम्मिति तण्ड्रि ॥
४. एन्त वेडिन नीकु सुन्तैन दयरादु पन्तमु सेयु ननु, एन्तटिवाडनु तण्ड्रि ॥
५. शरणागत त्राण, बिरुदाङ्कडवुगावा करुणिञ्चु भद्राचल, वर रामदास पोष ॥

| राग : दर्बार | ताळम् : छापु |
|---|---|

प. दिनमे सुदिनमु रामुनि नम्मु दिनमे सुदिनमु ।
१. प्रीतिनैन प्राणभीतिनैन भक्ति । साधनैन एरीतियैन दलचिन ॥
२. अर्थापेक्ष जन्म व्यर्थमु काकुण्ड । सार्थमुगा मिम्मु प्रार्थन जेसिन ॥
३. निरतमु मेरगु बङ्गारु पुष्पमुल रघु–वरुनि पादमुलनमर पूजिञ्चिन ॥
४. तनिवर ताळमु तम्बुरु श्रुतिगूर्चि । अनुरागमुन कीर्तनलु पाडुचुन्न ॥
५. घनमैन भक्तिके वेनगोनियेवेळ । मनसुन श्रीरामुनि चिन्तिञ्चिन ॥
६. भक्तुलतो रनुरक्तिनि गूडकु । भक्तिमीरगनु भक्तवत्सलु बोगडु ॥
७. रारा ननु गैकोरा नेरनम्मि– नारा निन्नु विडलेरा यनि वेडु ॥
८. दीनशरण्य महानुभाव ओ । गानलोल ननु करुणिञ्चुमनि गोलुचु ॥
९. वासिग श्रीहरिदासुल गूडुकोनि । वासुदेवुनि बहु वाञ्छतो पाडेडि ॥

१०. अक्करतोड भद्राचलमुललो । चक्कग सीतारामुल जूचिन ॥
११. करमुन वेलयु बङ्गार पुष्पमुलचेत । धर भद्रगिरि रामदास पूजिञ्चु ॥

| राग : धन्यासि | ताळम् : आदि |
|---|---|

प. हरि हरि राम राम नन्नरमर जूडकु । निरतमु नी नाम स्मरण येमरनु ॥
१. दशरथनन्दन दशमुखमर्दन । पशुपतिरञ्जन पापविमोचन ॥
२. मणिमयभूषण मञ्जुळ भाषण । रणजयभीषण रविकुल पोषण ॥
३. पतितपावनराम भद्राचल धाम । सततमु श्रीरामदासु नन्नेलुमा ॥

| राग : जञ्जुटि | ताळम् : रूपक |
|---|---|

प. कमल नयन वासुदेव करिवरद मां पाहि । अमलमृदुळ नळिनचरण अच्युतमुदं देहि ॥
१. जार चोर मेरुधीर साधुजन मन्दार । पाररहितघोर कलुष भवजलधि विदूर ॥
२. नारदादि गानलोल नन्दगोप बाल । वारिजासनानुकूल मानितगुणशील ॥
३. कामजनक श्यामसुन्दर कनकाम्बर धरण । रामदास वन्दितश्री राजीवाद्भुत चरण ॥

| राग : कल्याणि | ताळम् : झम्पे |
|---|---|

प. एमय्य राम ब्रह्मेन्द्रादुलकुलनैन नीमाय तेलिय वशमा ।
अ. कामारिविनुत गुणधाम कुवलयदळ । श्यामा नन्नुगन्न तण्ड्रि श्रीराम ॥
१. सुतुडनुचु दशरथुडु हितुडनुचु सुग्रिवुडु अति बलुण्डनुचु कपुलु ।
क्षितिनाथुडनुचु भूपतुलु गोलिचिरिगानि । पतित पावनुडनुचु मतिदलिय लेरैरि ॥
२. चेलिकाडनुचु पाण्डवुलुविरोधि वडञ्चु । नल जरासन्धादुलु ।
कलवाडवनिकुचेलण्डु नेरिगिरिगानि । जलजाक्षुडनि निन्नु सेविम्प लेरैरि ॥
३. नरुडवनि नरुलुतम दोरवनुचु यादवुलु । वरुडनुचु गोपसतुलु ।
